पौषमासः
वर्षम् – ६८
द्वितीयोऽङ्कः
विक्रमाब्दः २०७४
युगाब्दः ५११९
५ दिसम्बर २०१७

ISSN 2249-698X

# भारती

एकस्याः प्रतेः
१५/–
वार्षिक–शुल्कम्
१२०/–
आजीवनसदस्यता
१५००/–

## संस्कृत-मासपत्रिका



हिन्दुत्वमानरक्षायै समाजोत्थानसाधकः।
गुरुर्गोविन्दसिंहोऽसौ पूज्यो राष्ट्रेऽत्र भारते॥

भारती संस्कृत-मासपत्रिका

## विषय-सूची



| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | मङ्गलाचरणम् | श्री प्यारेमोहनशर्मा | ३ |
| २ | मासावतरणम् | श्री प्यारेमोहनशर्मा | ३ |
| ३ | सम्पादकीयम् | श्री प्यारेमोहनशर्मा | ६ |
| ४ | महाभारतस्य वैज्ञानिकतायाः अनुशीलनम् | डॉ. गीता शुक्ला | ७ |
| ५ | यान्त्रिकी चिन्ता | डॉ. हर्षदेव माधवः | ११ |
| ६ | मातृभाषा | डॉ. हर्षदेव माधवः | १२ |
| ७ | पुस्तकसमीक्षा | म.म. देवर्षिकलानाथशास्त्री | १३ |
| ८ | श्रीमतां बाबासाहेबआप्टेमहोदयानां व्यक्तित्ववर्णने- | वेणीमाधव गो. धर्माधिकारी | १५ |
| ९ | प्रेरकप्रसङ्गशतकम् | श्रीमती आराधना धर्माधिकारी | १६ |
| १० | भारतभूमेः सुपुत्राः | अविनाश शर्मा | १७ |
| ११ | उदितो मार्तण्डः | डॉ. रामदत्त शर्मा | १९ |
| १२ | भट्टश्रीमथुरानाथशास्त्रिणां साहित्ये लोकोत्सवाना... | नीलम शर्मा | २१ |
| १३ | वर्तमानकाले मानवजीवने योगस्य महत्त्वम् | सन्तोषकुमार शर्मा | २३ |
| १४ | पाणिनीयगणपाठस्य वैशिष्ट्यम् | अभिमन्यु मीणा | २४ |
| १५ | समस्यापूर्तिः सदाचारवन्तः | बद्रीप्रसादशर्मा | २५ |
| १६ | ज्योतिर्विद्या योगशास्त्रञ्च | नवनीतकुमारः | २६ |
| १७ | नारी-स्तम्भः | डॉ. राजेश्वरी भट्टः | ३१ |
| १८ | आयुर्वेद स्तम्भः | प्रो. बनवारीलालगौडः | ३३ |



### पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते ? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु- **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी-15, न्यू कॉलोनी, जयपुर-302001**

**दूरभाषः 0141-2379014, मो. 9783105699**

**(धनादेश/चैक/ड्राफ्ट केवल ''भारती'' के नाम से ही भेजें- प्रबन्ध सम्पादक)**




।। श्रीशः ।।

ISSN2249-698X

# भारती

संस्कृत-मासपत्रिका





**प्रमुखसंरक्षकाः**

जगद्गुरवो निम्बार्कपीठाचार्याः स्व. श्रीराधासर्वेश्वरशरणदेवाचार्याः

**प्रमुखसंरक्षकाः**

जगद्गुरुशङ्कराचार्यस्वामिश्रीजयेन्द्रसरस्वतीमहाभागाः

**प्रेरणास्रोतः**

स्व. परमाचार्यः

श्रीचन्द्रशेखरेन्द्रसरस्वतीमहाभागः

संस्थापकौ

स्व. उमाकान्तकेशवआप्टे

( बाबा साहब आप्टे )

स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः

स्वामी विश्वेशतीर्थः

स्वामी सत्यमित्रानन्दगिरिः

स्वामी रामभद्राचार्यः

आचार्यः अविचलदासः

स्वामी विद्यानन्दसरस्वती

प्रधानसम्पादकः

देवर्षिकलानाथशास्त्री

सम्पादकः

प्यारेमोहनशर्मा

प्रबन्धसम्पादकः

सुदामा शर्मा

सहसम्पादकौ

प्रो. सुरेन्द्रकुमारशर्मा

शिवशरणनाथत्रिपाठी

आर्थिकपरामर्शदाता

ओ.पी. गोयलः

पृष्ठसंयोजनम्

श्याम प्रिन्टर्स, 22 गोदाम, जयपुरम्

rajeshksharma69@gmail.com - 01414001974


## मङ्गलाचरणम्

योत्स्ये दुर्बलपक्षतो हि समरे श्रुत्वा वचः पाण्डवाः
संहारक्षमतां विचिन्त्य तनयं मौर्व्यास्तदाबोधयन्।
त्यक्तुं यद्वचनं मया तु गुरवे दत्तं समर्थोऽस्मि नो
श्रुत्वायाचत मस्तकं सपदि यस्तस्मै नमः श्रेयसे।।

## मासावतरणम्

आयाति प्रथमं यदा हि गगने सूर्यः प्रभाते तदा,
मार्तण्डस्य सुखप्रदे हि सततं स्थितवातपे श्रीपतिम्।
सन्ध्योपासनमाचरन्ति शनकैर्मन्त्रं जपन्तश्चिरम्,
भास्वन्तं सुखहेतवे प्रतिदिनं पौषे भजन्ते जनाः।।


कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com

पौषमासः
वर्षम् 68
वार्षिकशुल्कम् 120/-

विक्रमाब्दः 2074
दिसम्बर, 2017
अङ्कः - 2
पञ्चवार्षिकशुल्कम् 500/-
आजीवनसदस्यताशुल्कम् 1500/- रूप्यकाणि

।। ॐ ।।

# राष्ट्रीय स्वयंसेवक संघ

**प्रधान कार्यालय : डॉ. हेडगेवार भवन, महाल, नागपुर - 440032**
**दूरभाष : ( 0712 ) 2723003, 2720150, फैक्स नं. : ( 0712 ) 2721589**

**अश्विन शु. ९, युगाब्द 5119** **दिनांक : 29-09-2017**

# शुभसंदेश

संस्कृत भारत की प्राचीन भाषा है। वह भारत के सभी तथा संभवत: दुनियाँ की भी कई भाषाओं की जननी है। भारतीय संस्कृति, धर्म-शास्त्र, इतिहास आदि सभी का वह बृहत् संग्रह भी है व आद्य स्रोत भी है। भारत देश, भारत जन व भारतीय मानस तथा संस्कृत भाषा अभिन्न है। आधुनिक जगत् में भाषाशास्त्र की दृष्टि से तथा वैज्ञानिक ज्ञानव्यवहार के लिए सर्वथा व पूर्णत: उपयुक्त त्रुटिरहित भाषा संस्कृत ही है। इसलिये विश्व की उन्नति तथा भारत की उन्नति के लिये संस्कृत का ज्ञान, प्रचार व सार्वत्रिक प्रसार एक अनिवार्य पूर्ण शर्त है।

गत 70 वर्षों से इस महती आवश्यकता को पूर्ण करने में व्रतरत भाव से, सातत्य के साथ लगी ''भारती'' संस्कृत मासपत्रिका का अभिनन्दन तथा उसके संचालक पूर्ववर्ती तथा सद्य: कालीन कार्यकर्ताओं को श्रद्धापूर्वक अभिवादन।

शुभकामनाओं के साथ,

**अविनाश शर्मा**
व्यवस्थापक
भारती संस्कृत मास-पत्रिका
भारती भवन, जयपुर

आपका
**मोहन भागवत**



सत्यमेव जयते

## वसुन्धरा राजे

मुख्यमंत्री राजस्थान

# शुभकामना-सन्देशः

हर्ष का विषय है कि भारतीय संस्कृत प्रचार संस्थान, जयपुर द्वारा संस्कृत भाषा के प्रचार प्रसार हेतु प्रकाशित मासिक पत्रिका '**भारती**' के दीपावली विशेषांक का प्रकाशन किया जा रहा है।

संस्कृत विश्व की सबसे प्राचीन और अनेक भाषाओं की जननी है। इसका समृद्ध साहित्य मानवीय मूल्यों और आदर्शों का अनुपम उदाहरण है। 'वसुधैव कुटुम्बकम्' की उदात्त भावनाओं को समाहित किए हुए यह वाङ्मय सम्पूर्ण विश्व को अपनी ओर आकृष्ट करता है। योग की भाँति विश्व में अब संस्कृत साहित्य के पठन-पाठन के प्रति भी लोग रुचि लेने लगे हैं।

संस्कृत में लिखे गये उपनिषद्, पुराण, आरण्यक और आयुर्वेदिक ग्रंथों में ज्ञान का ऐसा खजाना छिपा हुआ है जिसे जन-जन तक पहुँचाकर हम अपने देश को फिर से विश्व-गुरु का सम्मान दिलवा सकते हैं। ऐसे में संस्कृत धर्म ग्रन्थों के संरक्षण व देववाणी के प्रचार-प्रसार में मासिक पत्रिका '**भारती**' का सराहनीय योगदान है।

आशा है कि '**भारती**' पत्रिका का यह विशेषांक पाठकों को संस्कृत भाषा और भारतीय संस्कृति की जानकारी प्रदान करने में उपयोगी सिद्ध होगा। मैं विशेषांक के सफल प्रकाशन की कामना करती हूँ।

**अविनाश शर्मा**
व्यवस्थापक
भारती संस्कृत मास-पत्रिका
भारती भवन, जयपुर

**(वसुन्धरा राजे)**

सम्पादकीयम्

# राज्यसर्वकारः स्वनिर्णयं परिशोधयेत्

...✍ पं. प्यारेमोहनशर्मा

दण्डविधिषु संशोधनाय 23 अक्टूबर 2017 दिवसे राजस्थानविधानसभायां विधेयकं सर्वकारः प्रास्तौत्। प्रस्तुतीकरणानन्तरमेव पूर्ववित्तमंत्री मानकचन्द्रः संविधानस्यानुच्छेदा (254) नुसारं संवैधानिकामापत्तिं प्रास्तौत्। (254) धारानुसारं संसद्द्वारा निर्मितेषु विधिषु राज्यविधानमण्डलैर्निर्मितेषु विधिषु चासंगतिर्भवेत्तर्हि संसद्द्वारा निर्मितो विधिरेव प्रभावी भविष्यति। सः पूर्वनिर्मितः स्यादनन्तरं वा नहि कोऽपि अन्तरः प्रभवति। संसदः विधिरेव मान्यो भविष्यति। 254(2) अनुच्छेदानुसारं राज्यविधानमण्डलद्वारा समवर्तिसूच्यां प्रगणितेषु विधिषु यदि परिवर्तनं कर्तुमिच्छति राज्यसर्वकारस्तदा राष्ट्रपतिनानुमतिप्राप्त्यनन्तरमेव स विधिः राज्ये प्रभावी भविष्यति। संविधानस्य 254 अनुच्छेदस्य विधानसभाप्रक्रियानुसारं प्रक्रियाया नियम 73,74 गतप्रावधानानां खण्डनं सदने मुख्यमन्त्री नैव कर्तुं शक्नोति। राष्ट्रपतेः अथवा राज्यपालस्यानुमतिं विना संशोधनं कर्तुं न शक्नोति। भारतीयदण्डसंहितायां प्रस्तावितेन संशोधनविधेयकेन अभिव्यक्तिस्वातन्त्र्यं बाधितं जायते। समाचारसंसाधनानां गतिरोधो जायते। अतः एष नियमः कृष्णनियमः। कलुषितनियमो विद्यते (काला कानून)। शासनाधिरूढं दलं ध्यायते यन्निकट-वर्तिनिर्वाचनात् पूर्वं न्यायाधीशानां लोकसेवकानां रक्षाव्याजेन यो नियमः सर्वकारः प्रास्तौत् तत्र विधायकाः मन्त्रिणश्च स्वतः सम्मिलन्ति। राज्ये राज्यसर्वकारस्य भृत्या अधिकारिणश्च 75 प्रतिशतं भ्रष्टाः सन्ति। अत्रेदमपि ध्यातव्यं यत् दण्डप्रक्रिया-संहितायां धारा 197 विद्यते अत्रेदं प्रावधानं विद्यते यत् जजमजिस्ट्रेटलोकसेवकानां विरुद्धं प्रसंज्ञानात् पूर्वं सर्वकारतः स्वीकृतिरावश्यकी अस्ति।

अतः धारा 197 न्यायाधीशप्रभृतीनां स्वयं रक्षां विदधाति। राज्यसर्वकारद्वारा प्रस्तावितो नियमः एस.एच.ओ., सी.आई. प्रभृतीनाम् (तफतीश) अन्वेषणाधिकारं समापयति। अत्र प्रश्नः समुदेति यत् वादानां (मुकदमा) पुलिसद्वारा अन्वेषणात् पूर्वं कानि-तानि साधनानि विद्यन्ते यैः एफ.आर. पत्रं दृष्ट्वा सर्वकारो निर्णयं कुर्यात् यदस्मिन् विषये स्वीकृतिः प्रदेया न वा। वादस्य (मुकदमा) स्वीकृतिप्रश्नः तदैवायाति यदा न्यायाधिपस्य विचारैरवगता भवेम। तदा वादसम्बन्धिनी पत्रावलिः राज्यसर्वकारसमीपे प्रेष्यते। तदा पुलिसद्वारा संगृहीतं साक्ष्यं दृष्ट्वा (चालान) स्वीकृतिविषये विचारो विधीयते। राज्यसरकारद्वारा प्रस्तावितेन संशोधनविधेय-केन न्यायपालिकाया अधिकाराः समाप्ताः संजायन्ते। अतः प्रस्तुतं संशोधनं विधेयकं राज्यसर्वकारः पूर्णतया समाप्तं कुर्यादिति।

यदि भ्रष्टाचारे अंकुशमिच्छति राज्यसर्वकारस्तर्हि अन्वेषणप्रक्रियां (जाँचप्रक्रिया) समयबद्धां विधाय परीक्षणसंस्थाभ्यो निर्णयाधिकारोऽपि प्रदेयः। तदैव भ्रष्टाचारिणो भीताः भविष्यन्ति। सऊदीअरबसर्वकारः भ्रष्टाचारारोपे एकादशराजकुमारान् (प्रिंसेज) अदण्ड-यत्। नैके मन्त्रिणोऽपि निगडिता भवितुं शुकवन्ति। निगडितराजकुमाराः स्वपदेभ्योऽपि च्याविताः। क्राउन-प्रिंस मोहम्मद विन सलमाननेतृत्वे नवघटितभ्रष्टाचार-निरोधसमितिः 2009 वर्षे जेददाहे प्रलयंकारी बाढसमये विहितसुरक्षाकार्याणां परीक्षणानन्तरमेतादृशीं प्रक्रियाम-करोत्। अस्याः समितेः अधिकारेषु भ्रष्टाचारिणां निगडनं यात्रासु प्रतिबन्धस्थापनं कोषकार्यालयेभ्यः आदान-प्रदाननिरोधनं विद्यते। वस्तुतः स्तुत्योऽयं प्रयासस्तस्य देशस्य। अस्माकं देशस्य सर्वकारा अपि अनेन मार्गेण भ्रष्टाचारावरोधने तत्परा भवेयुः।

# महाभारतस्य वैज्ञानिकतायाः अनुशीलनम्

❑ डॉ. गीता शुक्ला

'महत्त्वाद् भारवत्त्वाच्च महाभारतमुच्यते।' महाभारतं संस्कृतवाङ्मयस्य सारभूतमस्ति।

**श्रवणाञ्जलिपुटपेयं विरचितवान् भारताख्याममृतं यः।**
**तमहमरागमकृष्णं कृष्णद्वैपायनं वन्दे।**(1)

महाभारतस्य प्रगतेः चरणत्रयं-प्रथमे चरणे जय-नामकं द्वितीये चरणे भारताख्यं, तृतीये चरणे महाभारतनामकं महाकाव्यमेतत्। जये 8800 श्लोकाः भारते 24 सहस्रश्लोकाः, महाभारते च एकलक्षश्लोकाः। गुप्तकालीनशिलालेखेषु 'शतसाहस्री संहिता' इति नाम्ना ग्रन्थोऽयं निर्दिश्यते।

महाभारते कौरवपाण्डवानाम् इतिवृत्तं प्रधानतः वर्णितम्। महाकाव्येऽस्मिन् अष्टादशपर्वाणि सन्ति। महाभारतस्य रचनाविषेये उक्तवान् महर्षिर्व्यासः यत्-

**त्रिभिर्वर्षैः सदोत्थाय कृष्णद्वैपायनो मुनिः।**
**महाभारतमाख्यानं कृतवानिदमुत्तमम्।।**(2)

महाभारते काव्यं, दर्शनं, वैदिकतत्त्वम् अध्यात्मं, नीतितत्त्वम् ऐतिह्यम् आख्यानं राजनीतिसारः अन्यच्चापि लोकोपयुक्तं तत्त्वज्ञानं सुमधुरभाषाशैल्यां व्यासेनोपदिष्टम् अतएव उच्यते-

**धर्मे ह्यर्थे च कामे च मोक्षे च भरतर्षभ।**
**यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्।।**(3)

भारतं पञ्चमो वेदः इति उक्त्वा महाभारतस्य महत्त्वं प्रतिपादितम्। महाभारते उपर्युक्तज्ञानातिरिक्तं वैज्ञानिक-दृष्ट्या परिशील्यताम्। महाभारते उपलभ्यमानानां वैज्ञानिकतत्त्वानां वर्णनं क्रियते अत्र।

फिजिक्स-कैमिस्ट्री-बायो अर्थात् भौतिकं रसायनं जीवविज्ञानञ्च मुख्यरूपेण विज्ञानान्तर्गतं स्वीक्रियन्ते। एतदतिरिक्तं खगोलविज्ञान-वैद्यकीय-धातुविज्ञानादि-विषयकं वर्णनं प्राप्यते।

**सर्वप्रथमं पदार्थशास्त्रं भौतिकशास्त्रं वा विविच्यते।**

शास्त्रेऽस्मिन् अतिप्रसिद्धः सिद्धान्तः अस्ति- "वस्तूनाम् अन्यसापेक्षं चलनम्" प्राचीना कल्पना आसीत् यत् 'भूमिं परितः सूर्यः परिभ्रमति। अतः दिनं रात्रिश्च च भवतः' परन्तु अनुचिता सा कल्पना यतोहि-वस्तुतः सूर्यं परितः भूमिः परिभ्रमति-इति निरूपितवान् भौतिक-वैज्ञानिकः पञ्चदशे शतके(4)। सः प्रतिपादित-वान् यत् 'वस्तूनाम् अन्यसापेक्षचलनम्' यथा चलत्याधारे स्थितं निश्चलं वस्तु दृष्ट्वा 'तत् चलितम्' इति भ्रममनुभवन्ति जनाः। यथा च चलायमाने याने उपविष्टाः वयम् 'मार्गपार्श्वे स्थिताः वृक्षादयः चलन्ति' इति भ्रममानुभवामः महाभारते महर्षिव्यासेन लिखितमस्ति-

**चलं यथा दृष्टिपथं परैति सूक्ष्मं महद्रूपमिवाभिभाति।**
**स्वरूपमालोचयते च रूपं परं तथा बुद्धिपथं परैति।।**(5)

वस्तूनाम् अन्यसापेक्षं चलनम् इति मूलविचारस्य वर्णनम् अस्ति अस्य श्लोकस्य प्रथमे पादे। चलन्त्यां नौकायाम् उपविष्टस्य पुरुषस्य दृष्टिपथे आगते सति निश्चलम् अपि वस्तु चलदिव भासते। यथा सूक्ष्मम् अपि वस्तु काचेन दृष्टे सति बृहत् इव भासते, यथा च निर्मले दर्पणे वस्तुस्वरूपं तथैव दृश्यते आत्माऽपि तथैव बुद्धिपथमारोहति। एषा उपमा प्रयुक्ता व्यासेन यत् कूटस्थः निर्विकारी अपि आत्मा बुद्धेः विकारस्य कारणतः विकारी इव प्रतीयते। चलं यथा दृष्टिपथं परैति

इत्यंशे निरूपितः भौतिकविज्ञानस्य एष नियमः एव प्रयुक्तः अस्ति। यत्–चलति आधारे स्थितः जनः निश्चलं वस्तु दृष्ट्वा तत् चलति इति भ्रमं प्राप्नोति।[6] कोपर्निकस आर्यभटोऽपि स्वकीये ग्रन्थे एनमेव विचारं उल्लिखति–

**अनुलोमगतिर्नौस्थः पश्यत्यचलं विलोमगं यद्वत्।**
**अचलानि भान्ति तद्वत् समीपगानि लंकायाम्।।**[7]

भौतिकशास्त्रसम्बद्धौ अन्यौ अपि द्वौ विचारौ उक्तौ स्तः अस्मिन् श्लोके–चलं यथा दृष्टिपथं परैति। प्रथमः– 'काचकेन दर्शनेन सूक्ष्मम् अपि वस्तु वृहत् इव भासते' द्वितीयः– स्वच्छे दर्पणे वस्तुनः रूपस्य तादृशमेव प्रतिबिम्बं दृश्यते।

आश्चर्यस्य विषयः अस्ति यत् पञ्चदशशतके पाश्चात्यदेशे कोपर्निकसः यं विचारं निरूपितवान् तं विचारं सहस्रवर्षेभ्यः पूर्वमेव भारतीयाः मनीषिणः प्रतिपादित–वन्तः आसन्।

**मूढानाम् अवलिप्तानाम् असारं भासितं बहु।**
**दर्शयत्यन्तरात्मानम् अग्निरूपमिवांशुमान्।**[8]

महाभारतस्य उदाहरणेऽस्मिन् सूर्यकिरणानाम् एकत्र समाहरणेन अग्नेः उत्पत्तिः कर्तुं शक्या इत्यस्ति–

**यथादित्यान्मणेश्चापि वीरुद्भ्यश्चैव पावकः।**
**जायन्त एव समुदयात् कलानामिव जन्तवः।**[9]

अत्र सूर्यकान्तमणिः सूर्यकिरणान् गृह्णाति इत्यपि उक्तम्। अतएव स्पष्टमस्ति यत् भारतदेशे प्राचीनकाले–ऽपि काचतः मणिनिर्माणस्य ज्ञानम् आविष्कृतम् आसीत्।

महाभारते अयस्कान्तस्य गुणाः अपि उल्लिखिताः सन्ति।

**अभिद्रवत्ययस्कान्तमयो निश्चेतनं यथा।**
**स्वभावहेतुजा भावा यद्वदन्यदपीदृशम्।।**[10]

सुश्रुतेनापि उक्तं–**शरीरे लग्नाम् आणिं निष्कासयितुम् अयस्कान्तस्य उपयोगः कर्तुं शक्यते। कौटिल्यस्य ग्रन्थे अपि अयस्कान्तस्य उल्लेखः अस्ति।**[11]

वयं धृतस्य वस्त्रस्य निष्कासनसमये वस्त्रतः चट् चट् शब्दसहितं विद्युत्स्फुल्लिंगानां निस्सरणं प्रत्यक्षमेव अनुभवामः यदितद् वस्त्रं 'टेरिलन' नैलान् वा भवति। कौशेयं वस्त्रमपि विद्युत्स्फुलिंगान् निष्कासयति इत्यपि सर्वे जानन्ति एव। महाभारतेऽपि अस्योल्लेखः उपलभ्यते–

**एवमुक्त्वा जहासोच्चैः केशवः परवीरहा।**
**तस्य संस्मयतः शौरेः विद्युद्रूपा महात्मनः।।**

अपि च– **अंगुष्ठमात्राः विदशाः मुमुचुः पावकार्चिषः।**[12] उदाहरणेऽस्मिन् श्रीकृष्णस्य शरीरात् विद्युत्स्फुलिंगानां निस्सृतिः इति वर्णितम्। श्रीकृष्णस्य पीताम्बरं प्रसिद्धं तथा तत्स्थशरीरात् विद्युत्स्फुलिंगानां वर्णनमपि औचित्यपूर्णम्। एवमेव महाभारते अन्य–भौतिकशास्त्रसम्बन्धिनां बहूनां विषयाणाम् उल्लेखः द्रष्टुं शक्यते।

अधुना महाभारते रसायनशास्त्रस्य वर्णनं क्रियते–

**रसायनविदश्चैव सुप्रयुक्तरसायनाः।**
**दृश्यन्ते जरया भग्ना नगा नागैरिवोत्तमैः।।**[13]

रसायनप्रयोगकुशलाः अपि रसायनविदः वृद्धा–वस्थायां जरया अभिभूताः सन्तः गजैः भक्षिताः वृक्षाः इव शिथिलाः दृश्यन्ते। अनेन श्लोकेन ज्ञायते यत् तस्मिन् काले अनेके रसायनविशेषज्ञाः आसन् ते च नानाविधानां रसायनानां प्रयोगं कुर्वन्ति स्म–

तदानीन्तनाः जनाः नानारूपाणि सुगन्धद्रव्याण्यपि उपयुञ्जन्ते स्म–

**यथा तिलानामिह पुष्पसंश्रयात्**
**पृथक् पृथग्याति गुणोऽतिसोम्यताम्।**
**तथा नराणां भुवि भावितात्मनां।**
**यथाश्रयं सत्त्वगुणः प्रवर्तते।।**[14]

अर्थात् यथा भिन्नभिन्नपुष्पैः सह मेलनेन तिलस्य तैलं भिन्नं-भिन्नं गुणं गृह्णाति तथैव पुरुषाणां स्वभावोऽपि सत्पुरूषसङ्गेन सत्त्वगुणैः समन्वितः भवति।

श्लोकद्वये उक्तविषयस्य अधिकं विवरणं द्रष्टव्यम्

**यथा चाल्पेन माल्येन वासितं तिलसर्षपम्।**
**न मुञ्चति स्वकं गन्धं तद्वत् सूक्ष्मस्य दर्शनम्।।**[15]

एतयोः श्लोकयोः वर्णितम् यत् अल्पेन पुष्पमाल्येन वासिंत तिलतैलं सर्षपतैलं वा स्वकीयं सुगन्धिं न त्यजति। परन्तु बहुभिः माल्यैर्वासितं चेत् तर्हि मुञ्चति। अर्थात् अधिकपुष्पाणां संयोजनेन तिलतैलस्य सर्षपतैलस्य वा नैसर्गिकं गन्धं दूरीकृत्य तत् सुगन्धितं कृत्वा उपयुञ्जते स्म महाभारतकाले इति ज्ञायते।

महाभारते भवननगरादीनां निर्माणविषये यत्र तत्र विविधानि वर्णनानि सन्ति। यथा-मयनिर्मितस्य सभाभवनस्य वर्णनम्, लाक्षागृहवर्णनं, पाण्डवानां निमित्तं निर्मितस्य भवनस्य वर्णनम्। नगरनिर्माणकौशलस्य वर्णनं दर्शनीयम् अस्ति। **आयसैश्च महाचक्रैः शुशुभे तत् पुरोत्तमम्। सुविभक्तमहारथ्यं देवताबाधवर्जितम्।।**

अपि च -**विरोचमानं विविधैः पाण्डुरैर्भवनोत्तमैः।**
**तत् त्रिविष्टपसंकाशमिन्द्रप्रस्थं व्यरोचत।।**

तथा च- **चातुर्वर्ण्यसमाकीर्णं मान्यैः शिल्पिभिरावृतम्।**
**उपयोगसमर्थैश्च सर्वद्रव्यैः समावृतम्।।**

एतदतिरिक्तं महाभारते सुवर्ण-रजत-ताम्र-सीस-त्रपु-अयस इत्येतेषां षण्णां धातूनामुल्लेखः उपलभ्यते। महाभारतकाले आभरणत्वेन क्रयविक्रयव्यवहार-साधनत्वेन च सुवर्णेन रजतेन च प्रमुखं स्थानं प्राप्तम् आसीत्। सुवर्णस्य अग्नौ तापनेन शुद्धीकरणक्रमः तदानीम् एव व्यवहारे आसीत्।

**यथा हिरण्यकर्ता वैरूप्यमग्नौ विशोधयेत्।**
**बहुशोऽतिप्रयत्नेन महतात्मकृतेन ह।।**[16]

अर्थात् यथा तापनेन छेदनेन, घर्षणेन सुवर्णं परीक्ष्यते तथा नानाप्रकारेण शिष्याणामपि परीक्षा कर्त्तव्या।[17]

तदानीन्तनाः जनाः अङ्गारकप्राप्त्यर्थं प्रवृद्धानां महा-वृक्षाणां समूलं पातनम् अग्निना तेषां दाहनं च कुर्वन्ति स्म।

**'पुष्पं पुष्पं विचिन्वीत मूलच्छेदं न कारयेत्।**
**मालाकार इवारामे न यथाङ्गारकारकः।।'**[18]

अभिप्रायोऽस्ति यत् मालाकारः तस्यमूलच्छेदं न कारयति परन्तु अङ्गारकारकः वृक्षं समूलं छिनत्ति। धृतराष्ट्र! यथा अङ्गारकारः समूलान् वृक्षान् दहति तथा भवान् एतान् समूलं दग्धान् मा करोतु।

**वृक्षानङ्गारकानीव मैनान् धाक्षीः समूलकान्।**[19]

महाभारते रोगाणां चिकित्सायाः वर्णनम् अपि दृश्यते। आहारस्य अव्यवस्थया मनुष्यः अस्वस्थः भवति, रुग्णश्च भवति। के के ते रोगाः-

**अर्शरोगेऽक्षिरोगे च दन्तशूले गलग्रहे।।**
**जलोदरे तृषारोगे ज्वरगण्डविसूचिके।**
**श्वित्रकुष्ठेऽग्निदग्धे न सिध्माऽपस्मारयोरपि।।**[20]

तदानीन्तने काले द्विसप्ततिविधा चिकित्सा व्यवहारे आसीत्। ईदृशोल्लेखः अस्ति महाभारते-

**द्वासप्ततिविधा चैव शरीरस्थप्रतिक्रिया।**
**देशजातिकुलानां च धर्माः समनुवर्णिताः।।**[21]

चिकित्साविज्ञानस्य चरमोत्कर्षः वर्णनेऽस्मिन् द्रष्टुं शक्यते मातुः गर्भे नूतनस्य पिण्डस्य वर्धनं कथं भवति क्रमशः द्रष्टव्यम्।

प्रथमं कललं जायते, कललात् बुद्बुदस्योत्पत्तिः ततः पेशी, पेश्या अवयवानां निस्सरणं तथा नखरोमाणि भवन्ति।

**बिन्दुन्यासादयोयस्थाः शुक्रशोणितसम्भवाः।**
**यासामेव निपातेन कललं नाम जायते।।**[22]
**कललाद्बुद्बुदोत्पत्तिः........ नखरोमाणि चाङ्गतः।।**[23]

महाभारते सर्वेषाम् विज्ञानानां मूलाधारत्वेन परिगणितस्य खगोलशास्त्रस्य अपि बहवः विषयाः वर्णिताः सन्ति। तेषु 'कालगणना' अन्यतमा अस्ति। पाश्चात्याः विद्वांसः कथयन्ति यत् 'सेकेण्ड' इत्येतेन रूपेण कालविभागं गेलिलियो कृतवान्[24] परन्तु महाभारते तु 'सेकेण्ड' इत्यस्यापि विभागः कृतः दृश्यते। दर्शनीया सा कालगणना-

**काष्ठा निमेषा दस पञ्च चैव त्रिंशत्तु काष्ठा गणयेत् कलां ताम्।। त्रिंशत्कला चापि भवेन्मुहूर्तो भागः कलायाः दशमश्च यः स्यात्।।**[25]

चन्द्रस्य शुक्लपक्षे वृद्धिः कृष्णपक्षे क्षयश्च भूम्याः चलनकारणात् भवति महाभारते एतदपि निरूपितम् अस्ति।

**जन्मवृद्धिक्षयश्चास्य प्रत्यक्षेणोपलभ्यते।**
**सा तु चान्द्रमसी वृत्तिर्न तु तस्य शरीरिणः।।**[26]

महाभारते वृष्टिविज्ञान-कृषिविज्ञान-जलविज्ञाना-दयोऽपि वर्णिताः सन्ति।

वृष्ट्या विना क्षेत्रं उत्तमं फलं न ददाति। अतः यदा वृष्टिः न भवति तदा सिंचनकार्यं कृत्वा जलव्यवस्था करणीया। महाभारतकाले वृष्टेरभावे सस्यानां जलसेचनस्य कृत्रिमा व्यवस्था आसीत्। उदाहरणं दीयते-

**क्षेत्रं हि रसवत् शुद्धं कर्षकेणोपपादितम्।**
**ऋते वर्षं न कौन्तेय जातु निर्वर्तयेत् फलम्।।**[27]

अपि च - **तत्र वै पौरुषं ब्रूयुः आसेकं यत्नकारितम्। तत्र चापि ध्रुवः पश्येत् शोषणं दैवकारितम्।।**[28]

महाभारतकाले कृषिकार्यादिनिमित्तं नदीनां जलबन्धाः यत्र-तत्र निर्मीयन्ते स्म। यतोहि यथा नद्यां सम्यक् निबद्धः सेतुः स्रोतसः वर्धनं करोति तथा धर्मः अपि तपसस्सञ्चयं विस्तारयति इत्यर्थः।

अतएव स्पष्टम् यत् महाभारते भौतिकविज्ञान-रसायन-विज्ञान-चिकित्साविज्ञान-धातुविज्ञान-खगोलविज्ञान-कृषिविज्ञान इत्यादीनाम् उल्लेखः दृश्यते। यत् भारतीयविज्ञानपरम्परायाः परिचयं कारयति। यदि सर्वे अंशाः सूक्ष्मवैज्ञानिकदृष्ट्या परिशील्यन्ते तर्हि तादृशाः विशिष्टाः विषयाः मिलिष्यन्ति यैः वर्तमान-वैज्ञानिकाः अपि विस्मिताः भविष्यन्ति। आधुनिक-विज्ञानक्षेत्रे नवं चैतन्यं स्फुरेत् चेत् तर्हि महाभारतस्य वैज्ञानिकदृष्ट्यानुशीलनम् करणीयम्।

**सन्दर्भ :-**

1. वेणीसंहारे 1/4, 2. महाभारते 1/56/32, 3. महाभारते 1/62/53, 4. कोपर्निकसः, 5. शान्तिपर्वणि 202/23, 6. कोपर्निकसः, 7. गोलाध्याये 1 (आर्यभटीयस्य), 8. शान्तिपर्वणि 287/33, 9. शान्तिपर्वणि 320/26, 10. शान्तिपर्वणि 211/3, 11. अर्थशास्त्रे, 12. उद्योगपर्वणि 130/4, 13. शान्तिपर्वणि 28/47, 14. शान्तिपर्वणि 298/13, 15. शान्तिपर्वणि 280/14/15, 16. शान्तिपर्वणि 289/11, 17. शान्तिपर्वणि 329/46, 18. उद्योगपर्वणि 34/10, 19. उद्योगपर्वणि 62/16, 20. शान्तिपर्वणि 304/5,6, 21. शान्तिपर्वणि 59/71, 22. शान्तिपर्वणि 320/17, 23. शान्तिपर्वणि 320/18, 24. 1564-1642, 25. शान्तिपर्वणि 231/12, 26. शान्तिपर्वणि 103/17, 27. उद्योगपर्वणि 79/2, 28. उद्योगपर्वणि 79/3

**एसो. प्रो. संस्कृत-विभाग**
**भ.दी.आ.क.स्नातकोत्तर महाविद्यालय,**
**लखीमपुर-खीरी**

लघुकवितागवाक्षः

# यान्त्रिकी चिन्ता

❏ डॉ. हर्षदेव माधवः

**एकवारस्य पारशब्दः**
**O.T.P. (One Time Password)**

जीवनमस्ति
एकवारस्य पारशब्दः
जन्ममृत्युद्वयस्य
अन्तकाले
कदाचित्
साफल्यं लभ्यते
कदाचित्
कालो व्यर्थो नश्यति....
भवति पारशब्दोऽपि निरर्थकः।

**समीपपरिपथ ( Circuit ) -**
**छायाचित्रयन्त्रम् ( C.C Camera )**

हे अर्थमय समीपपरिपथ-च्छायाग्राहक !
हे तृतीयनेत्र !
हे परोक्षं प्रत्यक्षं कुर्वत् यन्त्र !
वद वद
कैः शब्दैर्हत्याः कृताः कारिता वा ?
केन शब्देन
हृदयोपरि मर्माघातः कृतः ?
के के शब्दाः सन्ति सन्त्रासवादिनः ?
केषु शब्देषु गोपितानि सन्ति
निशितान्यायुधानि ?
के शब्दा विनापि शस्त्रं
घ्नन्ति निर्दोषान् ?
के शब्दाः संस्कृतिं समूलामुन्मूलयन्ति ?
के शब्दाः
निलीयन्ते कदम्बे पश्यतोहरा भूत्वा ?
वृत्तिमुल्लङ्घ्य प्रविशन्ति
मनांसि प्रज्वालयितुम्?
दर्शय दर्शय मां
तेषा शब्दानां
गोपितरूपम्
छद्मचरितम्
नृशंसकार्याणि....।।

**8, राजतिलक बंगलोज, आबादनगर,**
**बसस्टोप के पास, बोपल, अमदाबाद-380058**

## निवेदन

भारती पत्रिका कार्यालय अपने आदरणीय ग्राहकों तक प्रतिमाह समय पर पत्रिका पहुँचाने की व्यवस्था सुनिश्चित करना चाहता है। इस दृष्टि से सभी ग्राहकों से निवेदन है कि निम्नानुसार अपनी सूचनाएं कार्यालय को पोस्ट कार्ड द्वारा अथवा इसी पत्र को काट कर लिफाफे में कार्यालय के पते पर भेजने का श्रम करें। यदि उक्त प्रकार से सूचना भेजने में कठिनाई हो तो मोबाइल नं.– 09352030291 / 8947055999 पर सूचना लिखवा सकते हैं अथवा **SMS** भी कर सकते हैं।

नाम.................................. ...........पुत्र/पुत्री श्री............................भवन संख्या...........

गली/ मोहल्ला/कॉलोनी..................................वाया/पोस्ट ऑफिस....................................

तहसील................................जिला........................राज्य.......................................

देश..................पिन........................................दूरभाष.......................................

मोबाईल नं............................ईमेल.....................................................................

निवेदक **सुदामा शर्मा**, प्रबन्ध सम्पादक
**भारती संस्कृत मास पत्रिका**
बी–15, भारती भवन, न्यू कॉलोनी, जयपुर–302001 (राज.) दूरभाष–2379014
ई–मेल – sanskritbharti09@gmail.com

**लघुकाव्यपृषताः**

# मातृभाषा

❑ डॉ. हर्षदेव माधवः

यस्यां भाषायाम्
उवाच लोपामुद्रा प्रणयवचनम्,
जज्ञिरे तपोवनानि ब्रह्मणो रहस्यानि
दध्युः अरण्यानि प्रत्यक्षब्रह्मणो रामस्वरूपम्,
ददर्श कुरुक्षेत्रं विश्वरूपस्य दिव्यतेजः,
यस्यां भाषायां-
सिप्रा शुश्राव वैदर्भीमाधुर्यम्
चकार भीषणप्रतिज्ञां देवव्रतः,
तस्यामेव भाषायामहं तामेव कथयामि यत्
हे मातः !
मम लेखनी
करोति तवैव भक्तिमिति। [मातृभाषादिवसे]

## शब्दाः

पूता वाजपेययज्ञेषु समिद्वत्
तप्ता अष्टाध्यायी-वह्नौ काञ्चनवत्
गोपिता औपनिषदिकतत्त्ववत्,
गलिता न्यायतर्कवत्,
क्षिप्ता वादविवादेषु शरवत्,
विस्तारिता बदरिकाश्रमे सूत्रजालवत्,
श्रुताः सरयूतटे क्रौञ्चचीत्कारवत्,
व्यथाप्लाविता दण्डकारण्यपाषाणवत्,
स्थिता लङ्काग्नौ ज्वालाभ्यो निर्गत्य चारित्र्यशुद्धिवत्,
वञ्चिता द्यूतसभायां सत्यवत्,
धृता रामचरणपादुकावत्,
गलिता सोमपात्रे सोमरसवत्,
वृताः पतिवरा कन्या भूत्वा वरेण्यवरवत्
परीक्षिताः शास्त्रनिकषे सुवर्णवत्,
मथिता अरणिखण्डसंपुटवत्,
विसृष्टा अश्वमेधाश्ववत्,
गुम्फिता वैदर्भ्यां पुष्पस्तबकवत्,
प्रज्वलिता और्वाग्निवत्,
विमुक्ताः कौटिल्यशिखावत्
उत्कीर्णाः शिलालेखेषु राजशासनवत्
प्रभ्रष्टा उर्वशीभूर्जपत्रवत्,
लम्बिताः सिद्धवटे वेतालवत्
पलायिताः सिंहासनद्वात्रिंशत्पुत्तलिकावत्
पिष्टाश्वरकोलखले औषधिवत्,
गोपिता वात्स्यायनकामसूत्रवत्,
संरक्षिता आगमरहस्यवत्,
विषदिग्धा जाता विषकन्यास्पर्शवत्,
बहिष्कृता व्रात्यमन्त्रवत्
त एव शब्दास्सन्ति
ये पुनरपि
कवचं संनह्य स्थिता
मम रचनासु........।

**8, राजतिलक बंगलोज, आबादनगर,**
**बसस्टोप के पास, बोपल, अमदाबाद-380058**

पुस्तकसमीक्षा

# स्तोत्रकाव्यम्

❑ म.म. देवर्षिकलानाथशास्त्री
प्रधानसम्पादकः

स्तोत्रकाव्यानामेकः प्रकारो ''लहरी'' नाम्नाऽप्यभिधीयत इति विदन्त्येव विज्ञाः। शङ्कराचार्यप्रणीता सौन्दर्यलहरी, आनन्दलहरीत्यादीनि शक्तिस्तुतिपराणि स्तोत्रकाव्यानि। राजस्थानीयेन सुप्रतिष्ठितेन कविवर्येण पं. रामस्वरूप-दोतोलिया इत्याख्येन तादृशमेव शक्तिस्तुतिपरकं स्तोत्रकाव्यं प्रणीतमस्ति यत् सपद्येव प्रकाशितम्। ''अम्बालहरीकाव्यम्'' इति शीर्षकं बिभ्राणमिदं स्तोत्रं 161 पद्येषु भगवतीमम्बां स्तौति। अम्बादेव्या एकं प्रसिद्धं मन्दिरं राजस्थानस्य निकटे एव गुर्जर प्रदेशे 'गिरनार' इत्याख्ये पर्वतस्थले प्रतिष्ठितमस्ति यद् भक्तानां हृदयान्यावर्जयति। अरावली-पर्वतो विश्वस्य प्राचीनतमेषु पर्वतेषु परिगण्यते, तस्यैव शाखा गुर्जरेष्वपि स्थिता। महाकविना माघेन रैवतकस्य यच्चमत्कारि वर्णनं विहितं तदपि अरावलीपर्वतकुलस्य सदस्यगिरेर्वर्णनमस्ति। तत्रस्थिता अम्बादेवी भक्तानामाराध्या। यद्यपि 51 शक्तिपीठेषु नैवाऽस्य नाम सामान्यतः परिलक्ष्यते किन्तु बहवोऽम्बादेवीं 51 शक्तिपीठान्तर्गतां मन्तुमप्यभिलषन्ति।

तामेव अम्बां परिलक्ष्य स्तोत्रकाव्यमिदं विविधेषुच्छन्दःसु विरचितमस्ति, न केवलं शिखरिण्याम्। शार्दूलविकीडितवसन्ततिलका, मन्दाक्रान्ता-प्रभृतीनि छन्दांस्यत्र प्रयुक्तानि। कविः परिचाययति यज्जूनागढांचले गिरनारपर्वते गोरक्षनाथगुहासमीपे पीठमम्बायाः प्रतिष्ठितं, यत्र सत्या हृदयं पपातेति कवेर्मान्यता। सम्पादनानन्तरमिदं काव्यं सानुवादं प्रकाशमापत्। प्रतिपद्यमन्वयः, भावार्थः, विशेषश्च (छन्दोनामेत्यादि) इत्यादि सामग्री मुद्रिताऽस्ति। प्रारम्भे बहूनां विदुषां भक्तानां च शुभाशंसा मुद्रिताः सम्पादकीयं च मुद्रितमस्ति। दशाधिकानां काव्यानां प्रणेतुः, जयपुरस्थायाः प्रशिक्षणसंस्थाया एकस्या अध्यक्षपदं बिभ्राणस्य कविवर्यस्येदं काव्यं हृदयान्यावर्जयिष्यति शक्तिपूजकानामिति वर्धापयामोऽस्य काव्यस्य रचयितारं सम्पादकांश्च।

**अम्बालहरीकाव्यम् कविः पं. रामस्वरूप दोतोलिया, सम्पादकाः, डॉ. सीताराम दोतोलिया, डॉ. महेश दोतोलिया, श्रीमती दीप्ति मीणा, प्रका. एम.बी. पब्लिशर्स एंड डिस्ट्रीब्यूटर, जयपुर पृ.सं. 200 मू. 400/-.**

## शुद्धाद्वैतदर्शनस्य लघुग्रन्थसंग्रहः

सुप्रसिद्धेषु चतुर्षु वैष्णवाचार्येषु (श्रीरामानुज-निम्बार्क-मध्व-वल्लभेतिनाम्ना प्रथितेषु) श्रीवल्लभाचार्यवर्यैर्ये नवीनाः पन्थानः प्रदर्शितास्तेषु प्रस्थानत्रयीविकल्परूपेण प्रमाणचतुष्टयस्य मान्यता (उपनिषद्-गीता-ब्रह्मसूत्र-श्रीमद्भागवतेति प्रमाणानि), विशिष्टाद्वैतस्थाने ''शुद्धाद्वैत'' प्रवर्तनम् इत्यादयः सुविदिताः। तेषां प्रस्थानं ''शुद्धाद्वैत'' नाम्ना प्रसिद्धं किन्तु तदनुयायिभिरनेकैराचार्यैः स्थापितमस्ति यदयं सिद्धान्तः ''साकारब्रह्मवादः'' अथवा ब्रह्मवाद एवाऽस्ति। तेषां मते न खलु जगन्मिथ्या, तदपि सत्यम्, संसारस्यानित्यताऽवश्यं मन्यते। किमिदं शुद्धाद्वैतप्रस्थानं, के च तस्य सिद्धान्ता इति प्रतिपादयितुं नाथद्वारस्य विद्याविभागाध्यक्षाणां विद्वद्वराणां स्व. श्रीदेवर्षिरमानाथशास्त्रिणामनेके ग्रन्थाः प्राकाशिषत ''ब्रह्मवाद'' ''साकार-ब्रह्मवादादि'' शीर्षकैः।

सम्प्रदायस्यास्य सकलशास्त्रविचक्षणैर्विद्वन्मूर्धन्यैराचार्यैः गोस्वामिश्रीश्याममनोहराचार्यैर्गतेषु दशकेष्वनेके ग्रन्था व्यलेखिषत, प्राकाशिषत, निःशुल्कं प्रासारिषत च येषु वल्लभसम्प्रदायस्य दार्शनिकसिद्धान्तानां विशदं विवेचनं व्यधायि। तैः प्राचामाचार्याणां सिद्धान्तानुद्धरद्भिः शुद्धाद्वैतस्य सिद्धान्ता विवेचिता ''लघुग्रन्थ-संग्रहेषु''। एवंविध एव द्वितीयो लघुग्रन्थसंग्रहः सपद्येव प्रकाशमायातोऽस्ति यस्मिन्नाचार्यैरेभिर्विलिखिता अनुष्टुप्सु निबद्धाः शास्त्रसमीक्षणपरा अष्टौ लेखाः प्रकाशिताः सन्ति।

एतस्य शीर्षकमेतस्य विषयवस्तु स्पष्टीकरोति ''ब्राह्मिक याथार्थ्य और ब्रह्मवाद की नानावादानुरोधिता।'' शीर्षकमिदं हिन्द्यामस्ति किन्तु अष्टौ लघुग्रन्थाः संस्कृते वाल्लभब्रह्मवादस्य व्यापकत्वं स्पष्टीकुर्वन्ति। वाल्लिभो ब्रह्मवादः अद्वैतं न स्थापयति किन्त्वस्य सङ्गतिबर्हुभिरन्यैर्वादैः सह स्पष्टीभवति। अस्मिन् हि विरुद्धधर्माश्रयब्रह्मवादस्य, सत्कारणतावादस्य, सत्कार्यवादस्य, कार्यकारणतादात्म्यवादस्य, लीलारूप-सृष्टिवादस्य वा सङ्गतिस्तु स्पष्टीभवत्येव किन्त्वयं व्यापकमाधारमाश्रयति, अतः विवर्तवादेनाप्यस्य सङ्गतिः प्रतीत्यसमुत्पादवादेनपि सङ्गतिर्दृष्टिगोचरीभवति। कर्तुमकर्तुमन्यथा-कर्तुं समर्थस्य ब्रह्मणोऽयं सिद्धान्तो नानावादानुरूपोऽस्ति अतः कथमेतस्य स्वरूपं विव्रियेत इति प्रदर्शयितुमाचार्यवर्यैर्महाप्रभोः श्रीवल्लभाचार्यस्य कारिकाभ्यो, वार्ताभ्यः, सुबोधिन्यादिटीकाभ्यश्च प्रमाणान्युद्धरणानि चाऽऽदाय तत्सम्मतं ब्रह्मस्वरूपं विवृतमस्ति, उपनिषदामुद्धरणैः सह दार्शनिकसिद्धान्ता अपि सङ्गमिता इति विदुषां कृते प्रौढदार्शनिकविचारमन्थनमत्र द्रष्टुं शक्यते ।

एकस्मिन् विमर्शे कर्मप्राधान्यवाद-ज्ञानप्राधान्यवादयोस्तारतम्यं विवेचितमस्ति, अपरस्मिन् स्पष्टीकृतमस्ति, अपरस्मिन् 'एकमेवाद्वितीयं ब्रह्म' इति ब्रह्मणो रसरूपता (अद्वैता) सहैव नाट्यशास्त्रीयस्य सुप्रथितस्य रसस्य (यस्य रूपं नास्त्यद्वैतात्मकं) तेन सह सङ्गतिर्विवेचिताऽस्ति, एकत्र ब्रह्मणो रूप-नाम-कर्मात्मकं वैविध्यं वर्णितमास्ते।

सर्वेषां छन्दोबद्धानां लघुग्रन्थानामन्ते उपनिषदादीनां सन्दर्भाः सङ्केतिताः सन्ति। प्रारम्भे हिन्दीनिबद्धायां प्रस्तावनायां शोधस्यास्य पृष्ठभूमिः स्पष्टीकृताऽस्ति यत्र सङ्केतितमस्ति यत् पुष्टिमार्गसिद्धान्तस्य नामकरणं ''शुद्धाद्वैते'' ति नाऽस्ति श्रीवल्लभाचार्यसमकालीनम्, न वा श्रीविट्ठलनाथसमकालीनम्, यतोहि तैस्तु ''साकार-ब्रह्मवाद'' नाम्ना बहुत्रैतस्य परिचयः कारितः। ''शुद्धाद्वैत'' नामकरणं परवर्तिनी घटना। सर्वमिदं महाप्रभुवल्लभाचार्यस्य ग्रन्थानां सन्दर्भैः श्री श्याम-मनोहराचार्यैर्भूमिकायामस्यां स्पष्टीकृतमस्ति।

इत्थं हि ब्रह्मविवेचनपराणां शोधनिबन्धानां (अनुष्टुप्सु विलिखितानां) लघुग्रन्थेतिनामकरणं कृत्वा योऽयं द्वितीयः संग्रहग्रन्थः प्रकाशितः स दर्शनाध्येतॄणां कृते संग्रहणीयोऽध्येतव्यश्चाऽस्ति, नूतनान् विचारमार्गानपि प्रदर्शयतीति विदुषामाचार्याणां कृतेऽपि च माननीयः। एवंविधा अनेके ग्रन्था आचार्यवर्यैरेभिराविष्कृता येषामध्ययनं दर्शनशास्त्रस्योच्चतरकक्षासु नितरामुपयोगि सेत्स्यतीति स्पष्टमेव।

**ब्राह्मिक याथार्थ्य और ब्रह्मवाद की नानावादानुरोधिता ( लघुग्रन्थसंग्रह 2 ) ले. गोस्वामीश्याममनोहराचार्य, प्रकाशक स्वयं लेखक, 63 स्वस्तिक सोसाइटी जुहू, चौथा रास्ता, विले पार्ले , मुंबई 56, पृ.सं. 140 मू. निःशुल्क।**

**श्रीमतां बाबासाहेबआप्टेमहोदयानां व्यक्तित्ववर्णने-** **द्वात्रिंशत्तमः प्रसङ्गः**

# सावधानाः

❑ वेणीमाधव गो. धर्माधिकारी

पूर्वाञ्चलक्षेत्रीय-प्रचारकाः श्रीमन्तो भाऊराव-देवरसमहाभागा वर्णयन्ति-नागपुरे स्वबाल्यावस्थायां यदा ऽहं संघस्य स्वयंसेवकः समभवम्, तदाप्रभृत्येव बाबामहोदयानां सम्पर्कः प्रारब्धः। किशोरावस्थामुत्तीर्य महाविद्यालये प्रवेशो गृहीतः। संघकार्यं प्रति रुचिरप्युत्त-रोत्तरं वर्द्धमानैवासीत्। मनसि भारवोऽयं दृढतरो जायमान आसीद् यज्जीवनमिदं संघकार्यार्थमेव व्यतीतं भवेत्। परं संघकार्यस्यार्थः कः? तस्मिन् समये देशस्य स्वाधीनताप्राप्तिः देवरसस्योत्कृष्टाकांक्षा आसीत्। मुखादनुच्चार्यापि संघस्य दैनिकशाखापद्धतिः सैनिक-शिक्षणाभ्यासं अनुशासनादिकमपि चास्मभ्यं स्वयं-सेवकेभ्यो युवकेभ्यः स्वाधीनताप्राप्तेः परमोत्तमं साधनं प्रतीयतेस्म। अत एव च स्वयुवकोचितोत्साहे वयं संघकार्यपद्धतेः सैनिकवद् दृश्यमाने पक्षे एवाधिकां रुचिं गृह्णन्त आस्म। तस्य बौद्धिकपक्षस्योपेक्षां कुर्वन्तश्चास्म। परं बाबामहोदयाः अस्मान् संघकार्यस्य सुयोग्यं साधनं निर्मातुं सदैव चिन्तिता आसन्। मया स्मर्यते यत्तेषु दिवसेषु यदाहं नागपुरे महाविद्यालस्य छात्र आसम्, श्रीमन्तो बाबामहोदयाः प्रतिरविवारे मध्याह्ने अस्मान् सर्वान् तरुणशाखाधिकारिणः श्रीमार्त्तण्डराव-जगमहोदयानामेकस्मिन् सभागारसदृशे कक्षे एकत्रीकृत्य संघविचारसरणिसम्बद्धं विषयं पूर्वनिर्दिष्टमधि-कृत्य, भारतस्य स्वाधीनसंग्रामस्य वा उद्बोधकप्रसङ्गांश्च बोधयन्ति। एवमस्माकं बौद्धिकविकासस्य प्रयत्नः कृतः।

शनैः शनैः वयं सर्वे संघकार्यस्य विस्तारार्थं नागपुराद् बहिरन्यप्रान्तेषु प्रेषिताः। अहमुत्तरप्रदेशे आगतः, श्रीएकनाथरानाडेमहोदयाः मध्यप्रदेशे गताः, श्रीवसन्तराव ओकमहोदयाः देहल्यां गताः। तदा अस्मासु संघकार्य-विस्तारार्थमौत्सुक्यमुत्साहश्च पर्याप्त आसीत्परमनुभवस्य न्यूनतासीत्। वयं सर्वेऽपरिपक्वा इवास्म। नवनवैर्जनैः कथं मिलितव्यम्, प्रतिष्ठितानां प्रौढानां सम्मुखे संघकार्यं कथं स्थापनीयमिदं सर्वन्तु अनुभवेनैव ज्ञातुं शक्यते। इदं च प्रारम्भिके प्रशिक्षणे तदभ्यासस्य श्रेयो यदि कस्मै दीयेत तद् बाबामहोदयेभ्य एव। ते एकस्य द्वयोर्वा मासयोः कार्यक्रमं विधायास्माकं नूतने कार्यक्षेत्रे आगच्छन्तिस्म। अस्माभिस्सह छात्रावासेष्वेव निवसन्तिस्म। सम्पूर्णं दिनं पदयात्रां कुर्वन्तः अस्मान् सह नीत्वा नवनवैर्ज-नैर्मिलन्तिस्म। केनापि प्रतिष्ठितेन वयोवृद्धेनापि मिलने ते संकोचं न कुर्वन्तिस्म। तेषां कृते एव वयं प्रतिष्ठिता-नामधिवेशनस्यायोजनमकुर्म। एतादृशेष्वेवाधिवेश-नेष्वस्माभिरवबुद्धं नवानां प्रौढानां च सम्मुखे संघकार्यं कथं स्थापनीय मिति।

तेषां तर्कशक्तिरतीवाद्भुतासीत्। कतिपयवारं तु ते विपक्षिणां तर्काणां प्रतिपादनं प्रारभन्तेस्म, वयं सर्वे चिन्ताव्यग्राः भूत्वा अचिन्तयाम बाबामहोदयाः किं कुर्वन्तीति। परं विपक्षस्य सर्वान् तर्कान् प्रस्थाप्य ते प्रभावपूर्णेन वचनेन तेषां खण्डनं कुर्वन्तिस्म। वस्तुतस्ते शुद्धरूपेण बौद्धिका आसन्। नवनवानां विषयाणा-मध्ययने मनने, नवानां नवानां ग्रन्थामन्वेषणं, तेषामध्ययनं कृत्वान्यैः सह चर्चाकरणे तेभ्यो रसप्राप्तिर्भवतिस्म।

कतिपयवारं तु खिन्नता भवतिस्म तेषां बौद्धिकश्रवणेन। स्वीये युवकोचितोत्साहेऽस्मभ्यं भासतेस्म यदि वयमेवमध्ययनाध्यापने संलग्नाः तदा शाखानां विस्तारः कथं भविष्यति। शाखानां योजने सुयोग्यानां गणशिक्षकाणां मुख्यशिक्षकाणां च निर्माणं कथं भविष्यति। बौद्धिकं चिन्तनं मननं तु पश्चादपि भवितुं शक्नोति। किन्न प्रथमं समग्रशक्त्या संघकार्यविस्तारः क्रियते। किं न वीरवृत्तिपूर्णानां कुशलानां युवकानां देशव्यापिनमभेद्यं च संगठनं विधाय मातृभूमेः स्वाधीनतायै एको निर्णायकः प्रयत्नः क्रियेत।

भावनायाः अस्या अस्माकं मनसि प्राबल्येन अस्मभ्यं तेषां बौद्धिकत्वे खिन्नतापि भवतिस्म परमद्य यदाहं बाबामहोदयानामखण्डस्य कर्ममयजीवनस्य विषये चिन्तयामि तदा सत्यमेव भावाभिभूत एव भवामि। कर्मणस्तेषामिव क्लिष्टां साधनामस्मासु कोऽपि किं कुर्यात्। प्रायः सम्पूर्णेऽपि भारते संघकार्यस्य नीविपाषाणस्य निर्माणं तेनैकाकिना कर्मयोगिना कृतम्। तैर्निर्मितायां नीव्यां किञ्चिदेव भित्तिकानिर्माणमस्माभिः कृतम्।

सत्यमेव ते निष्कामकर्मयोगिन आसन्। स्वाहं-कारस्य स्वशरीरस्य वा मोहस्तेषु नासीदेव। देहावसा-नात्पूर्वमेव ते स्वशरीरं प्रति विरक्ता इवाभवन्। तेभ्यः आभासोऽभवद् यदनेन शरीरेण यावती राष्ट्रसेवा भाव्या सा संजाता। अधुनास्य वहने न कोऽपि लाभः। स्वस्याल-नन्यसहयोगिनां श्रीमतां दादापरमार्थानां मृत्योरपि महानाघातस्तेभ्य आसीत्। नेत्रयोर्ज्योतेः क्षीणत्वेन जीवनं प्रत्यौदासीन्यं घनीभूतमभवत्। ते कथयन्नासन् अधुनाहं पठितुमसमर्थः लिखित्तुमप्यसमर्थः पूर्णतया द्रष्टुमप्य-समर्थस्तदा जीवनस्य न कोऽपि लाभः दातुं नास्ति किञ्चिदपि।

**ब्रह्मपुरी, जयपुरम्**

---

**प्रेरकप्रसङ्गशतकम्** — **अष्टपञ्चाशत्तमः प्रसङ्गः**

# अतिथीनामागमनेन विश्रामः

❑ **श्रीमती आराधना धर्माधिकारी**

वन्दना एकस्मिन् दिने स्वसख्याः श्वेतायाः गृहे गता। द्वारे एव सख्या श्वश्रूः संमार्जनीमादाय संमार्जयन्ती सम्प्राप्ता। वंदनायाः किंचित्कालं वार्त्तालापः सख्याः श्वश्र्वा संजातः। श्वेतायाःश्वश्रूः अवदत्-पुत्रि ! अतीव श्रान्ताऽस्मि। कतिपयदिनेभ्य अस्माकं गृहे अतिथीनामा-गमनमेव न जातम्। अहं केवलमस्यैव प्रतीक्षां कुर्वन्त्यास्मि वन्दनया कथितम्-मातः ! तदा कार्याधिक्यं भविष्यति भवत्या तु विपरीतमुच्यते। वृद्धा अवदत्-अस्माकं गृहे तु अतिथीनामागमने मह्यं विश्रामः प्राप्नोति। अतिथीनां समक्षं साधुः प्रदर्शनार्थमेव स्यात् कतिपयदिनं यावन्मां किञ्चिदपि कर्त्तुमवरूणद्धि। यतस्तेषां सम्मुखेऽहं प्रतिदिवसमिव कार्यं कुर्यां चेज्जनाः किं कथयिष्यन्ति इत्यपयशसो भयान्मां विश्रामं कर्त्तुं कथयति स्वयमेव च सर्वाणि कार्याणि करोति। अत एव चाहमतिथीनां प्रतीक्षां करोमि।

**218, धर्माधिकारिभवनं, ब्रह्मपुरी, जयपुरम्**

बालोपयोगिनी जीवनवृत्तमाला

# भारतभूमेः सुपुत्राः

❑ अविनाश शर्मा

**शैलेन्द्रः**- सप्तम्यां शताब्द्यां शैलेन्द्रवंशस्याधिराज्यं ब्रह्मदेशे प्रस्थापितमभूत्। अस्य वंशस्य प्रथमः पुरुषः शैलेन्द्रनामक आसीत्। तदनन्तरं स वंशोपि शैलेन्द्रस्य नाम्नैव इतिहासे प्रसिद्धो जातः। अद्यतनीयाः मलेशिया हिन्देशिया (इन्डोनेशिया) इत्यादयः द्वीपसमूहाः प्राचीनसमये ''सुवर्णद्वीपं'' इति नाम्ना सम्बोधिता आसन्। अस्मिन् सुवर्णद्वीपे प्रथमशताब्द्याः हिन्दूनामाधिपत्यस्यारम्भो बभूव। सप्तम्यां शताब्द्यां कलिङ्गप्रदेशात् शैलेन्द्रवंशस्य मूलपुरुषेण ब्रह्मदेशस्योपरि आक्रमणं कृतम्। अष्टमशताब्दीपर्यन्तं तेषामधिराज्यं ब्रह्मदेशे अक्षुण्णमासीत्। अष्टमशताब्द्यां तेषां राज्यविस्तारस्यारम्भो सुवर्णद्वीपेऽपि जातः। शताब्दी-द्वयानन्तरं तस्य शैलेन्द्रद्वीपस्याधिराज्यं सम्पूर्णे सुवर्णद्वीपे प्रस्थापितमभूत्। चतुर्दशशताब्दीं यावत् तद्राज्यं तत्रावस्थितमासीत्। सप्तशत-वर्षाणि यावत् शैलेन्द्रवंशस्य राजानः भारतीयधर्मस्य संस्कृतेश्च संरक्षणं संवर्धनञ्च सुवर्णद्वीपे कृतवन्तः।

**बप्पा रावलः**- अष्टमशताब्द्यां राजस्थानप्रदेशान्तर्गते उदयपुरमेवाड़विभागे अस्य उदयपुरनगरस्योत्तरे भागे नाग-इद (नागदा) ग्रामे बप्पारावलस्य राज्यम् आसीत्। अस्य पूर्वपुरुषाणां सौराष्ट्रे बल्लभीपुरे शासनमासीत्। चित्तौडदुर्ग-शासकस्य मोरीनृपतेः श्रीमानसिंहस्य एष भागिनेय आसीत्। अर्बदेशस्य मुहम्मदीयशासकेन सिन्धुप्रदेशं विजित्य यदा चित्तौडदुर्गस्योपरि आक्रमणं कृतं तदा श्रीबप्पारावमहोदयेन तस्योपरि प्रत्याक्रमणं विधाय भीषणे संग्रामे ईदृशः पराजयो दत्तो येन ते सर्वे आक्रामकाः सिन्धुप्रदेशं प्रति पलायितवन्तः। अनेन विजयलाभेन प्रसन्नः चित्तौडाधिपतिः निःसन्तानकः श्रीमानसिंहः एनं बप्पारावलमेव सिहांसनारूढं कृतवान्। अर्बदेशस्य अक्रामणकारि विजेतारं श्रीबप्पारावलं जनाः 'आर्यकुलकमलदिवाकरः,'इत्युपाधिना विभूषित-वन्तः।

षड्विंशतिवर्षाणि यावत् चित्तौडदुर्गे राज्यं कृत्वा तदनन्तरं ८१० संवत्सरे स्वसैन्येन सह बप्पारावलः अर्बदेशं प्रति साम्राज्यविस्तारार्थ गतवान्। तत्र कन्धार-ईराक-ईरानित्यादिदेशानां शासकान् पराजित्य तत्र निवासं कृतवान्। तत्रत्याः बहवः शासकाः विजेत्रे तस्मै स्वकन्यां दत्त्वा अनेन सह सम्बन्धं प्रस्थापितवन्तः। तत्र तस्य बहवः पुत्रा बभूवुः। ते कालान्तरे तत्रत्यप्रदेशस्य शासकाः संजाताः। बप्पारावलः स्ववार्धक्ये निजपुत्रान् समस्तं निजराज्यं समर्प्य स्वयं शिवोपासको यतिर्भूत्वा शेषजीवनं शिवाराधने एव यापितवान्।

**चाणक्यश्चन्द्रगुप्तश्च विक्रमः शालिवाहनः।**
**अशोकः पुष्यमित्रश्च खारवेलः सुनीतिमान्।।**

**चाणक्यः**- ख्रिष्टाब्दारम्भात् पूर्वम् चतुर्थशताब्द्यां भारतवर्षे दिग्विजयिनः ग्रीकराजस्य सिकन्दरस्य आक्रमणं बभूव। पञ्चाम्बुप्रदेशं विजित्य सः मगधसाम्राज्यस्योपरि आक्रमणं कर्तुम् ऐच्छत्। अस्य परकीयप्रबलाक्रमणस्यावरोधो विष्णुगुप्तेन चाणक्येन तस्य सच्छिष्येण चन्द्रगुप्तमौर्येण च कृतः। मगधराजेन घनानन्देन चाणक्यस्य तिरस्कारः कृतः। अनेन क्रुद्धः आर्यचाणक्यः तम् अविवेकिनं कर्तव्यभ्रष्टं घनानन्दं सिंहासनात् अपदस्थं विधाय तिरस्कारस्य प्रतीकारं कृतवान्। चाणक्यस्य अर्थशास्त्रविषयको ग्रन्थो राजनीत्यां अतीव प्रामाणिको ग्रन्थो गण्यते विद्वद्भिः।

**चन्द्रगुप्तः**- चन्द्रगुप्तस्य पिता नन्दवंशीय आसीत् माता चासीत् मुरा नामकी स्त्री। अतः स मौर्य इति नाम्ना प्रख्यातोऽभूत्। महापद्मनन्देन चन्द्रगुप्तो निर्वासितः। तदनन्तरं तस्य चाणक्येन सह प्रगाढः सम्बन्धः संजातः। तौ वायव्यसीमाप्रदेशे संघटनात्मकं कार्यं कृतवन्तौ। तदेव सुसंघटितं सैन्यबलं गृहीत्वा आर्यचाणक्यस्य च राजनैतिकबलं प्राप्य चन्द्रगुप्तमौर्येण सिकन्दरेण विजितः सम्पूर्णः प्रदेशः स्वायती कृतः। कालान्तरे स मगधसाम्राज्यस्याधिपतिः संजातः।

चन्द्रगुप्तस्य साम्राज्यमतीव विशालं प्रबलञ्चासीत्। ऐतिहासिकदृष्ट्या अस्य गणना मध्ययुगीनभारतस्य प्रथम-सम्राट्-सम्बन्धेन गण्यते। सिकन्दरस्य सेनापतिः श्रीसेल्यूक-सनिकेटरः यदा स्वसैन्यबलेन सह भारते आगत्य आक्रमणं कृतवान् तदा सः चन्द्रगुप्तेन पराजितोऽभूत्। तस्मिन् समये यः पारस्परिकः सन्धिर्जातः तस्मिन् चन्द्रगुप्तः स्वराज्यविस्तारे हिरात-कंदहार-मकरानप्रान्तान् प्राप्तवान्। अनेन सह सैल्यूकसेन स्वकन्यां अपि अस्मै चन्द्रगुप्ताय प्रदाय अनेन सह नैकटिकः सम्बन्धः प्रस्थापितः। भारतवर्षस्य प्राकृतिकी सीमा हिन्दूकुशपर्वतपर्यन्ता मन्यते। सम्राट्चन्द्रगुप्तस्य साम्राज्यसीमा तत्पर्वतपर्यन्तमासीत्। तदनन्तरं कोऽपि सम्राट् स्वसाम्राज्य-

विस्तारं हिन्दूकुशपर्वतपर्यन्तं कर्तुम् नाशकत्। सम्राट् चन्द्रगुप्तः स्वगुरुवर्यं आर्यचाणक्यं प्रति प्रगाढश्रद्धायुत आसीत्।

**शैलेन्द्र :**- सातवीं शताब्दी में शैलेन्द्रवंश का अधिराज्य ब्रह्मदेश में प्रस्थापित हुआ। इस वंश का प्रथम पुरुष शैलेन्द्र नामका था। इसके पश्चात् वह वंश भी शैलेन्द्र के नाम से ही इतिहास में प्रसिद्ध हो गया। आज का मलेशिया हिन्देशिया (इण्डोनेशिया) इत्यादि द्वीपसमूह प्राचीन समय में सुवर्णद्वीप इस नाम से सम्बोधित थे। इस सुवर्णद्वीप में प्रथमशताब्दी से हिन्दुओं का आधिपत्य प्रारम्भ हुवा। सातवीं शताब्दी में कलिङ्ग प्रदेश से शैलेन्द्रवंश के मूल पुरुष ने ब्रह्मदेश के ऊपर आक्रमण किया। आठवीं शताब्दी तक उनका अधिराज्य ब्रह्मदेश में अक्षुण्ण था। आठवी शताब्दी में उनके राज्य विस्तार का आरम्भ सुवर्ण द्वीप में भी हुआ। दो शताब्दियों के पश्चात् उस शैलेन्द्रवंश का अधिराज्य सम्पूर्ण सुवर्णद्वीप में प्रस्थापित हो गया। चौदहवीं शताब्दी तक वह राज्य वहां अवस्थित था। सात सौ वर्ष तक शैलेन्द्रवंश के राजाओं ने भारतीय धर्म का और संस्कृति का संरक्षण और संवर्धन सुवर्णद्वीप में किया।

**बप्पा रावलः**- आठवीं शताब्दी में राजस्थान प्रदेश के अन्तर्गत उदयपुर मेवाड़ विभाग में इस उदयपुर नगरी के उत्तरभाग में नागइद (नागदा) ग्राम में बप्पारावल का राज्य था। इनके पूर्वपुरुषों का सौराष्ट्र में बलमीपुर में राज्य था। चित्तौडगढ़ के मोरी राजा श्रीमानसिंह के ये भानजे थे। अर्ब देश के मुसलमान बादशाह ने सिन्धु प्रदेश जीतकर जब चित्तौड़ दुर्ग पर आक्रामण किया तब श्रीबप्पारावल ने इसके ऊपर प्रत्याक्रमण करके भीषण संग्राम में ऐसी पराजय दी जिससे वे सारे आक्रमक सिन्धुप्रदेश की ओर भाग गए। इस विजयलाभ से प्रसन्न हुए चित्तौडगढ़ के राजा जो निःसन्तान थे, उन श्रीमानसिंह ने इन बप्पारावल को सिंहासन पर बिठा दिया। अर्बदेश के आक्रामकों के विजेता श्रीबप्पारावल को लोगों ने 'आर्यकुलकमलदिवाकर' इस उपाधि से विभूषित किया।

२६ वर्ष चित्तौडगढ पर राज्य करके इसके पश्चात् ८१० संवत्सर में अपनी सेना के साथ साम्राज्य विस्तार हेतु अरब देश की ओर गए। वहां कन्धार-ईराक-ईरान इत्यादि देशों के शासकों को पराजित करके वहीं निवास किया। वहां के बहुत से बादशाहों ने इन विजेता को अपनी कन्या देकर इनके साथ सम्बन्ध प्रस्थापित कर लिया। वहां उनके बहुत से पुत्र हुए। वे आगे जाकर उधर के प्रदेश के शासक हुए। बप्पारावल ने अपने वार्धक्य में अपने पुत्रों को अपना समस्त राज्य देकर स्वयं शिवोपासक यति बनकर अपना अवशिष्ट जीवन शिव आराधन में ही व्यतीत किया।

**चाणक्यः**- ईसवीय सन् के आरम्भ होने से पूर्व चौथी शताब्दी में भारतवर्ष में दिग्विजयी ग्रीकराजा सिकन्दर का आक्रमण हुआ। पञ्जाब प्रदेश को जीत कर उसने मगध साम्राज्य के ऊपर आक्रमण करने की इच्छा की। इस परकीय प्रबल आक्रमण का अवरोध विष्णुगुप्त चाणक्य ने और उनके सद्शिष्य चन्द्रगुप्त मौर्य ने किया। मगधराज घनानन्द ने चाणक्य का तिरस्कार किया। इससे क्रुद्ध आर्य चाणक्य ने उस अविवेकी पथभ्रष्ट घनानन्द को सिंहासन से अपदस्थ करके तिरस्कार का प्रतीकार किया। चाणक्य का अर्थशास्त्रविषयक ग्रन्थ राजनीति में अतीव प्रामाणिक ग्रन्थ गिना जाता है।

**चन्द्रगुप्तः**- चन्द्रगुप्त के पिता नन्दवंशीय थे और माता मुरा नामकी स्त्री थी। अतः वे मौर्य इस नाम से प्रख्यात थे। महापद्मनन्द ने चन्द्रगुप्त को निर्वासित किया। तदनन्तर उनका चाणक्य के साथ प्रगाढ सम्बन्ध हुआ। उन दोनों ने वायव्य सीमा प्रदेश में संगठन कार्य किया। उस सुसंगठित सैन्य दल को लेकर और आर्य चाणक्य के राजनैतिक बल को प्राप्त करके चन्द्रगुप्त मौर्य ने सिकन्दर से जीते हुए सम्पूर्ण प्रदेश को स्वतन्त्र किया। कालान्तर में वह मगध साम्राज्य का अधिपति हुआ।

चद्रगुप्त का साम्राज्य अतीव विशाल और प्रबल था। ऐतिहासिक दृष्टि से इसकी गणना मध्ययुगीन भारत के प्रथम सम्राट् के नाते गिनी जाती है। सिकन्दर का सेनापति श्रीसेल्यूकस निकेटरने जब अपने सैन्य बल के साथ भारत में आकर आक्रमण किया तब वह चन्द्रगुप्त से पराजित हुआ। उस समय जो पारस्परिक सन्धि हुई उसमें चन्द्रगुप्त ने अपने राज्य विस्तार में हिरात-कन्दहार तथा मकरान प्रदेशों को प्राप्त किया। इनके साथ सैल्यूकस ने अपनी कन्या भी इन चन्द्रगुप्त को देकर इनके साथ निकट सम्बन्ध प्रस्थापित किया। भारत वर्ष की प्राकृतिक सीमा हिन्दूकुश पर्वत पर्यन्त मानी जाती है। सम्राट् चन्द्रगुप्त की साम्राज्य सीमा उस पर्वतपर्यन्त थी। इसके पश्चात् कोई भी सम्राट् अपने राज्यविस्तार को हिन्दुकुश पर्वत तक कर नहीं सका। सम्राट् चन्द्रगुप्त अपने गुरुवर्य आर्य चाणक्य के प्रति प्रगाढ श्रद्धा रखते थे।

**किशनपोलबाजारः, जयपुरम्**

कथा

# उदितो मार्तण्डः

❑ डॉ. रामदत्त शर्मा

'डाउन मेल' लौहपथगामिनी सेतौ गच्छन्त्यासीत्, तत्रस्थो यात्री राजेशो ध्वनिना किञ्चित् अव्यवस्थित-चित्तः आसीत्, अनवीनां पञ्जिकां हस्ते धृत्वा पृष्ठानि पठन्नासीत् तत्रैव समक्षम् एको व्यापारी धूम्रपानं कुर्वन्नासीत्।

राजेशो विश्वविद्यालयस्य छात्रवृत्तिभोक्ता प्रत्याशी आसीत्। स्वनिर्वाचित-विषयोपरि आत्ममन्थनं कुर्वन् चिन्तयति यत् कथं प्रश्नोत्तरं करणीयम्। यानं तीव्रं लक्ष्यं प्रति सरति। राजेशो निद्रयार्धोन्मीलितनेत्रः शनैः शनैः निद्रामवाप्तवान्।

यदा राजेशो निद्रां त्यक्त्वा उदतिष्ठत् तदा भगवान् भास्करः भासमानः आसीत्। राजेशः शौचं गन्तुमिच्छति परं तत्र गमनं सम्भवं न प्रतीयते। अतो मनोभावनां सम्मर्द्य तत्रैवातिष्ठत्। स्वीयपञ्जिकायां व्यस्तोऽभवत्।

राष्ट्रीयभाषा-महाकाव्यानां सूचीं निर्मितवान्। समाजदर्शनस्य विषये काश्चन परिभाषाः एकत्रीकृताः ग्रन्थेभ्यः। स्वविषयाय उच्चकोटेः विदुषां सम्मतिपत्रं तेन स्वीकृतम् आसीत्। आत्मविश्वासेन पञ्चसप्तलेखाः अपि स्वीकृताः येषु केचन विश्वविद्यालयस्य स्तरानुकूलाः आसन्। यानस्य मन्दगत्या तेन अनुमीयते यत् तस्य गन्तव्यमागतमस्ति। ततः स्यूतं पाथेयं च एकीकृत्य यानस्य वातायनं प्रति अपससार। यानं स्थिरं भवति यदा तदैव स ततो निकासद्वारं प्रति आगच्छति तत्र बहवः लघुवाहनचालकाः स्थानम् आह्वयन्ति, यात्रिणः आकर्षयन्ति। राजेशः सर्वान् परित्यज्य बसयानं प्रति गतवान्। ततः संकीर्णमार्गे गच्छन् दिनेशस्य गृहस्य द्वारं करतलेन ताड़यति। द्वारमुदद्घाट्य दिनेशो राजेशम् अवलोक्य प्रफुल्लः जातः, मित्रं कण्ठे उरसा मिलति वदति च आगम्यताम्-2 मित्र/आगम्यताम्। पत्नीं प्रति देवि! राजेशः आगतः, किमपि पेयं आनीयताम्। किञ्चित् क्षणानन्तरं स्मितमुखी भ्रातृजाया पेयं नीत्वा तत्रागतवती। राजेशेन अभिवादनं कृत्वा पेयं स्वीकृतम्। शौचस्नानादि-नित्यकार्यैः निवृत्य वाहनेन गृहात् निर्गतौ। मार्गे राजेशो विश्वविद्यालयस्य मुख्यद्वारं गतवान्, दिनेशः स्वकार्यालयं प्रति निर्गतः। राजेशो विश्वविद्यालये अन्तः गत्वा विभागं प्रति अपससार।

विभागाध्यक्षस्य कक्षस्य समक्षं केचन छात्राः वार्तालापं कुर्वन्तः अतिष्ठन्, तत्र राजेशस्य मित्रं विश्वनाथः आसीत्, यः संस्कृतविषये शोधकार्यं कुर्वान्नासीत्। अत्र मिलित्वा द्वौ कुशलक्षेमं पृष्टवन्तौ। कालः शनैः-शनैः गच्छन् आसीत्, विभागाध्यक्षस्य सेवको वारं-वारं इतस्ततो भ्रमति स्म। कश्चन तत्र धूम्रपानेन तनावमुक्तिं प्राप्तुं प्रयासं कुर्वन्नासीत्, कश्चन चक्षुस्नानेन आत्मानं धन्यम् अकरोत्।

प्रो. छाबड़ा आंग्लभाषायाः तत्र बहुवर्षीयां वेशभूषां धृत्वा समागतो दर्शनेन तेन स्वकीया वृद्धावस्था वस्त्रैः कृतकृष्णकेशैः आच्छादिता। दर्शनविभागाध्यक्षः डॉ. दीनानाथः स्थूलोपनेत्रं धृत्वा शुद्धभारतीयवेशभूषया तत्रागतः। एवमेव क्रमशः एकैकशः तत्र आगत्य कक्षे उपविष्टाः। साक्षात्कारस्य कालः समीपमागतः। छात्रा अन्तः प्रविष्टाः क्रमशः। यदा राजेशस्य क्रमः आगतः स पूर्णात्मविश्वासेन अन्तः गतवान्।

विनम्रतया प्रविश्य निश्चितस्थानं उपविष्टवान्। आंग्लभाषाध्यक्षः प्रो. छाबड़ा पृष्टवान् 'व्हाट इज योर टॉपिक फॉर द रिसर्च'? 'सर आई एम वर्किंग ऑन द सब्जेक्ट-स्टेट ऑफ सोसायटी एज डेपिक्टेड इन द हिन्दी लिटरेचर।' राजेशः उत्तरं दत्तवान्। 'व्हाट डू यू

मीन बाई सोसाइटी' पुनः उक्तवान् किं दर्शनं ते विषयः? 'न, न' राजेशः उक्तवान्, प्रो. पराशरः पुनः उक्तवान् हिन्दी भाषायाः छात्रो दर्शनविषये कथं शोधं कर्तुं शक्तः। राजेशः स्थितिं स्पष्टीकुर्वन् कथयति, श्रीमन्! दर्शनस्य वस्तुतः अर्थ एवम् 'दर्श्यते अनेन इति दर्शनम् कथ्यते' विषयः तथा कोऽपि भवेत्। न, न। तव विषयः सम्यक् नास्ति। त्वं कथं कार्यं करिष्यसि, नाहम् अवगन्तुं समर्थः, प्रो. पराशरः उच्चस्वरेण उक्तवान्। राजेशः श्रीमन्! 'विषयोऽयं शोध-सदस्य-बोर्ड समिति द्वारा स्वीकृतः, सदस्येषु भवान् अपि एक आसीत्। इदानीं शङ्का कीदृशी? भवताम् आशिषा निर्देशात् च अहं कार्यं करिष्यामि न कापि चिन्ता।' 'न, न, त्वं अस्मिन् विषये कार्यं न करिष्यसि, नाहम् अनुमतिं दास्यामि।' सर! सर! राजेशः प्रो. पाराशरं श्रुत्वा निवेदनमेव कुर्वन् आसीत्। तदैव प्रो. भार्गवो राजेशं महाकाव्यलक्षणं पृष्टवान्। तेनोक्तं तत्र सर्गबन्धो महाकाव्यमिति वर्णितम्। हिन्दी भाषायां कामायनी, संस्कृते च रघुवंशादि महाकाव्यानि सन्ति। प्रो. भार्गवो राजेशं प्रशंसितवान्, राजेशः किञ्चित् शान्तिमवाप्य दीर्घं निश्वस्य अतिष्ठत्। परं तदैव हिन्दी विभागीयः डॉ. सिंहः प्रश्नं क्षिप्तवान्-आश्चर्यम्! भवान् तु सर्वत्र महाकाव्यानि एव पश्यति परं महाकाव्ये तु द्वे एव रामायणं महाभारतञ्च।

डॉ. भार्गवस्य अनुमोदनं वाञ्छन् डॉ. सिंहः, भार्गवं प्रति पश्यन् आसीत्।

डा. भार्गव उत्तरेत् ततः पूर्वमेव राजेशः उक्तवान् श्रीमन् नैवं। रामायणं महाभारतञ्च, महाकाव्ये न स्तः। इमे तु वीरकाव्ये उपजीव्ये काव्ये स्तः। महाकाव्यस्य विषये तु अहं पूर्वमेव उक्तवान् यत् विशेषलक्षणयुतम् एव महाकाव्यम् भवति। संस्कृते तु शताधिकानि महाकाव्यानि अस्याम् एवं स्थित्यां लिखितानि सन्ति। महाकाव्यन्तु वीरकाव्यस्य लघुरूपमस्ति। अथवा वीरकाव्यात् बहूनि महाकाव्यानि भवितुं शक्यन्ते।

अध्यक्षः पाराशरो मध्ये एव उक्तवान् छात्रवृत्तेः भवतां का आवश्यकता। विना छात्रवृत्तिं कार्यम् अधिकं शोभनं-भवति। राजेशः कोपेनावदत्-श्रीमन् यदि छात्रवृत्तिं न दातुमिच्छन्ति भवन्तः तदा किमर्थम् अहं आहूतः। कि भवन्तः कृष्णं, श्वेतं कर्तुमिच्छन्ति। विश्वस्तोऽहं मदपेक्षया कस्मैचित् अयोग्याय छात्रवृत्तिं दातुमिच्छन्ति निन्दितं कार्यं भवताम्। अहं वदिष्यामि तदा कथञ्चित् विश्वसेदपि। भ्रष्टाचारसंलिप्ताः सन्ति। प्रो. पाराशरः क्रोधितो रक्तमुखो भूत्वाऽवदत्, पश्यतु प्रो. भार्गव! भवतः शिष्यस्य वार्ता तस्य व्यवहारश्च। वयं अस्मै छात्रवृत्तिं दातुमिच्छामः परम् अयम् अयोग्यः अकुशलव्यवहारी। अस्मै छात्राय कथं छात्रवृत्तिं दातुं शक्नुमः। डॉ. भार्गवश्च मौनं स्वीकृत्य स्थितः राजेशः उक्तवान् श्रीमन्! अकारणं प्रताड़नां कुर्वन्तो, बहवः आचार्याः दृष्टा. मया। भवन्तः किमपि कुर्वन्तु परं मम कार्ये बाधां न प्रकटयेयुः, अहं पी.एच.डी. उपाधिं धारयिष्यामि एव। उदीयमानं सूर्यम् अवरोद्धुं असम्भवम्। भवन्तः तु अस्ताचलं गच्छन्तः सूर्याः इव शीघ्रमेव अस्ताः भविष्यन्ति, न कोऽपि वन्दनमपि करिष्यति। इदम् उक्त्वा राजेशो दिनेशस्य गृहं प्राप्तवान् आसीत्। अग्रिमे दिवसे समाचारपत्रे प्रकाशितं- द्वादशशोधछात्रेभ्यः छात्रवृत्ति-प्राप्तकर्तृणां सूचीनां मध्ये राजेशस्य स्थाने हिन्दी-विभाग-प्राध्यापकस्य भार्यायाः नामासीत्, या मासत्रयपूर्वमेव एम.ए. उत्तीर्णं कृतवती। डॉ. पाराशरेण सह सम्बन्धिता आसीत्। राजेशः अनवलोकयन् नवीनसंकल्पेन गृहं प्रति अचलत्।

**प्लाट नं. 7102, प्रथमतलम्, पाकेट्-16,**
**सैक्टर्-24 रोहिणी, नवदेहली-110085**

# भट्टश्रीमथुरानाथशास्त्रिणां साहित्ये लोकोत्सवानां चित्रणम्

❑ - नीलम शर्मा

भट्टमथुरानाथः शास्त्री राजस्थानीयां संस्कृतिमधि-कृत्य अत्र राजस्थानप्रान्ते प्रचलितानां लोकोत्सवानां चारुचित्रणं जयपुरवैभवे करोति। पुरा अत्र ग्राम्यजीवनं नितान्तमुल्लासमयम् आसीत्। तदानीन्तने काले अर्थोपार्जनं प्रति नाधिकमवधानं दीयते स्म। अत एव जनानामभिरुचिः समाजे एव केन्द्रिता आसीत्। राजनीतेर्दायित्वम् शासकवर्गस्यैव आसीत्। तत्रापि वंशानुगतराजपरम्पराया विद्यमानत्वात् जनसामान्यं न राजनीतौ भूमिकां निर्वहतिस्म। यद्यपि महोदयानाममीषां जीवनस्य मध्यकाले भारतीयैः स्वातन्त्र्यं समुपलब्धं तथापि राजस्थाने स्वातन्त्र्योपरान्तमपि देशीराज्यानाम् एकीकरणानन्तरं चापि राजपरम्परायाः प्रतिष्ठा पूर्ववत् आसीत्। जनसामान्यस्य दृष्टिकोणेऽपि नाधिकं परिवर्तनं तदा दृश्यमानमविद्यत। तदानीं राजानोऽपि लोक-परम्पराणां प्रश्रयाय लोकोत्सवानाम् आयोजने स्वकीयां भूमिकां निर्वहन्ति स्म। स्वयमपि ते लोकोत्सवान् आयोजयन्ति स्म।

**1. सांस्कृतिका लोकोत्सवाः-**

भट्टमथुरानाथः जयपुरवैभवे राजस्थानीयायाः संस्कृतेर्महत्त्वं दर्शयितुम् अत्रत्यविशिष्टोत्सवानां वर्णनं कृतवान्। एषामुत्सवानां विवरणं निम्नानुसारमत्रो-ल्लिख्यते-

**1.वसन्तपञ्चम्युत्सवः**-वसन्तपञ्चमी राजस्थानीय-परम्परायां ऋतुपरिवर्तनस्य उत्सवोऽस्ति। वसन्तः ऋतूनां राजेति प्रथितमेव। अत एव वसन्तस्यागमने तत्स्वागताय वसन्तोत्सव आयोज्यते स्म। वसन्तः समेषां कृते उल्लासप्रदो भवति। वसन्तपञ्चमी माघमासे आयोज्यते, तदा शिशिरर्तुरेव भवति। किन्तु वसन्तस्यागमनं सूचयितुमस्योत्सवस्य परम्परा प्रचलिता।

**2. सूर्यसप्तमी**- भगवतः सूर्यस्य आराधनायै सूर्यसप्तम्या महत्त्वं पुराणादिषु अनेकत्र प्रतिपादितं वर्तते। भारतीयपरम्परायां उत्तरभारते विशेषेण सूर्यसप्तम्या पर्व आयोज्यते। इदमपि माघमासे विशेषेण आयोज्यमानं भवति वस्तुतस्त्वेतन्माध्यमेन शिशिरर्तोः समाप्तिः सूच्यते। भगवतः सूर्यस्य उत्तरायणे गमनेन शीतापगमे ग्रीष्मसंचारस्यारम्भो भवति। अतएव सूर्यदेवस्य स्वागतं पर्वण्यस्मिन् विधीयते।

**3. होलिकोत्सवः**-होलिकोत्सवस्यायोजनं फाल्गुने मासि भवति। फाल्गुनमासे प्रकृत्या उल्लासमयी स्थिति-र्भवति। सा च जनसामान्यस्य मानसं होलिकोत्सवाय प्रेरयति। होलिकोत्सवस्य परम्परा राजस्थानीयाञ्च-लिकसंस्कृतौ विशिष्टा आसीत्। अत्रत्यं जनसामान्यं होलिकोत्सवे विशिष्टाभिरुचिसम्पन्नमासीत्।

**4. शीतलाष्टमीः** - चैत्रमासे शीतलाष्टमी पूर्व-राजस्थान आयोज्यते। शीतला-दुर्गाया एव विशिष्टं स्वरूपमस्ति। राजस्थाने शीतलानाम्नो रोगविशेषस्य निदानाय शीतलादेव्याः पूजायाः प्रचलनं पारम्परिक-मस्ति।

**5. विजयदशमीमहोत्सवः** - राजस्थाने विजय-दशम्याः पर्व दशहरा पर्वेति नाम्ना विख्यातमस्ति। अस्मिन् दिवसे अनेकत्र गजवाजिकादीनां प्रदर्शनं भवति स्म दुन्दुभिनादपूर्वकमुल्लासस्याभिव्यक्तिरपि रोचते स्म। मेलकानामयोजनान्यपि अस्मिन् पर्वणि लोकपरम्परयैव भवन्ति।

**6. दीपमालिकामहोत्सवः**- कार्तिकमासस्मावास्यायां तिथौ दीपमालिकामहोत्सवस्यायोजनानि सम्पूर्णभारतराष्ट्रे विधीयमानानि भवन्ति। दीपमालिका सामाजिकानां कृते स्वच्छताया प्रकाश्यमानतायाश्च प्रेरणां प्रददाति। देव्या महालक्ष्म्याः कृपाकाँक्षिणः तदागमनं सम्भाव्य तत्स्वागताय द्वारमध्ये वन्दनवाराणि पुष्पमाल्यानि च लम्बयन्ते। दीपान् प्रज्ज्वाल्य प्रकाशस्य विस्तारस्तमस उन्मूलनं च वस्तुतः सामाजिकान् 'तमसो मा ज्योतिर्गमय' इत्यस्य संदेशं प्रददाति।

भट्टमहाभागा जयपुरवैभवे दीपमालोत्सवमेव वर्णयन्ति-

**''खचितविचित्रचित्रजाला भाति भूमिरियं,**
**सद्वन्दनमाला द्वारराजिरसौ भासते।''**
**बालामोदवर्धिनी विशालाङ्गणवेदिकासु,**
**सूतपुष्पमाला पुष्पझरिका प्रकाशते।।**

**सामाजिका लोकोत्सवाः**-

भट्टमथुरानाथः शास्त्री जयपुरवैभवे सामाजिकलोकोत्सवानां वर्णनान्यपि उपस्थापयति। राजस्थानीयाः सामाजिकसद्भावोद्भावने सदैव प्रयतमाना आसन्। तेषां मनोभावान् विषयीकृत्य एषां सामाजिकोत्सवानां पारम्परिकं स्वरूपं च चित्रयित्वा भट्टमहाभागः वस्तुतः समाजसंस्कृत्योः धर्मस्य च युगपदुपस्थानं दर्शयति।

भट्टमहाभागेन कृतानां सामाजिकलोकोत्सवानां विवरणमत्र निम्नानुसारं प्रस्तोतुं शक्यते-

**1. वटपूजोत्सवः**- वटसावित्र्या दिवसे प्रायेण स्त्रीभिः वटपूजोत्सव सम्पाद्यते स्म। अत्रत्यासु स्त्रीषु एतादृशी मान्यताऽस्ति यत् सावित्रीमनुष्ठाय वटपूजया सौभाग्यं चिरस्थायि भवति। एवं च दीर्घसौभाग्यसत्कामनया अस्योत्सवस्यायोजनं विधीयमानं भवति। वटपूजोत्सवस्य स्वरूपं पूर्णतया धार्मिकविधानेन विधीयते। धर्मं प्रति प्रतिष्ठामनुगन्तारो जनाः वटपूजनोत्सवाय स्त्रीणामिदं प्रवर्त्तनं भृशं शंसन्ति। अयमुत्सवो ज्येष्ठमासस्यामावस्याया दिवसे आयोज्यते। अस्य विषये भट्टमहाभाग उल्लिखति-

**''सौभाग्योपसाविवटसावित्रीपवित्रदिने,**
**सुभगसवित्रीजने मोदघटा संदधाति।**
**पुष्पधूपनैवेद्यादिपूजासाधनानि यत्र,**
**सुन्दरीसमाजो वटमूलमनु संप्रयाति।।''**

**2. भरला नवमी** :- अयं हि उत्सवः स्त्रीपुरुषाणां मिथोऽनुरागजनकत्वात् कामोत्सवस्यैवापरं रूपमिति केचिदामनन्ति। केषांचन मतेऽयमुत्सवः शृङ्गारोत्सवो भवति। यतो हि अस्मिन् दिवसे स्त्रियः पुरुषाश्च शृङ्गारिकीं साजसज्जां विदधति। पश्चात् समूहबद्धाः स्त्रियः समूहबद्धाः पुरुषाश्च गीतानि गायन्ति।

**3. हरियाली अमावस्या** - अयमपि दिवसः सामाजिकोत्सवरूपेणायोज्यमानो भवति। श्रावणमासस्यामावस्यायां तिथौ यथा वर्षोत्सव आयोज्यते तथैवायं सम्पाद्यते। अस्मिन्नुत्सवे प्राकृतिकदृश्यानि दृष्ट्वा परमं सौख्यं भजमाना जनाः स्वीयानुन्मुक्तान् हृदयोद्गारान् संगिरन्ते।

**4. सन्ध्योत्सवः**- सन्ध्याकालिकोत्सवानामपि परम्परा जयपत्तनीयलोकपरम्परायामासीत् विविधस्थानेषु विविधप्रकारेण उत्सवोऽयमायोज्यते स्म। तथा हि केलिसन्ध्या, रङ्गसन्ध्या, रामसन्ध्या, भाट्टसन्ध्या इत्यादयो भेदा अस्यात्र प्रचलिता आसन्। सन्ध्याशब्दोऽत्र कौतुकव्यपदेशेन प्रयुज्यते। सायंकालेऽनुष्ठेयत्वाच्चास्य सन्ध्येतिसंज्ञा व्यवह्रियते।

**शोधच्छात्रा**
**रा.सं.सं. भोपाल परिसरे, भोपाल ( म.प्र. )**

# वर्तमानकाले मानवजीवने योगस्य महत्त्वम्

❑ सन्तोषकुमार शर्मा

''योगविद्या'' भारतीय-संस्कृत्याः सुदृढः आधार-स्तम्भः वर्तते। योगेन भारतीयसंस्कृत्याः आध्यात्मिक-प्रवृत्तीनां विकासः अभवत्। भारतीयसंस्कृतौ बहूनि रत्नानि सन्ति, तेषु रत्नेषु 'योगविज्ञानम्' इत्यपि एकं वर्तते, येन मानवजीवने आध्यात्मिकी उन्नतिः सम्भवति। भारतदेशे आध्यात्मिकप्रवृत्तीनां विकासः प्राचीन-कालादेव सुदृढः आसीत्। तस्मात् कारणात् एव भारतदेशः सम्पूर्णसंसारे विश्वगुरुः इति नाम्ना प्रसिद्ध आसीत्। प्रवृत्तिरियं गुरुशिष्यपरम्परामाध्यमेन अद्यपर्यन्तं प्रचलिता विद्यते। अस्माकं वेद-उपनिषद्-पुराण-इतिहासादिषु ग्रन्थेषु योगविद्यायाः बहु महत्वं वर्णितमस्ति।

भारतीयसंस्कृतेः सुप्रसिद्धे ग्रन्थे श्रीमद्भगवद्-गीतायां योगविद्यायाः महत्त्वं विशदरूपेण प्रतिपादित-मस्ति। तद्यथा

**''योगस्थः कुरु कर्माणि संगं त्यक्त्वा धनञ्जय।**
**सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते।।''** 12/48

अर्थात् योगे स्थित्वा कर्मफलं त्यक्त्वा सिद्धौ असिद्धौ च समो भूत्वा कर्मसु समताभाव एव 'योग' उच्यते।

एवमेव आचार्येण पतंजलिना 'योगसूत्रम्' इति ग्रन्थे योगस्य महत्त्वं स्वीकृतम्। तद्यथा-

**''योगश्चित्तवृत्तिनिरोधः।( योग 1/2 )''**

अर्थात् चित्तस्य वृत्तीनां निरोध एव 'योगः' इति भवति। अधुना संसारे अनेकाः समस्याः समागताः। मनुष्याणां स्वभावे बहूनि दुर्व्यसनानि समागतानि। अनेकाः शारीरिकमानसिकविकृतयः समुत्पन्नाः। योगविद्यामाध्यमेन विभिन्नानां शारीरिक-मानसिक-भावनात्मकसमस्यानाम् अपि निवारणं नियन्त्रणं च भवति।

योगसाधनामाध्यमेन मनुष्यस्य न केवलं स्वकीयः विकासः भवति अपितु समाजस्य अपि विकासः भवति। योगविद्यया मनुष्यस्य चारित्रिकः विकासोऽपि जायते। यदा एकः सच्चरित्रवान् पुरुषः समाजस्य राष्ट्रस्य च नेतृत्वं करोति तदा राष्ट्रस्य विकासः तीव्रगत्या भवति।

अस्माकं योगविद्यायाः महत्त्वं ज्ञात्वा इदानीं संसारस्य अन्यानि राष्ट्राणि अपि योगमनुसरन्ति। योग-विद्यायाः महत्त्वं ज्ञात्वा एव ''संयुक्त राष्ट्र संघः'' (UNO) इति संस्थया जूनमासस्य एकविंशतिः दिनांकः ''योग दिवसः'' इति रूपेण घोषितः। अवसरेऽस्मिन् प्रत्येकस्मिन् राष्ट्रे योगस्य विभिन्नानाम् आयामानां यथा-यम-नियम-आसन-प्राणायाम-प्रत्याहार धारणा-ध्यान समाधि इत्यादीनाम् अंगानाम् अभ्यासः क्रियते। योगेन मनुष्यस्य स्थूलशरीरस्य विकर्षणं भवति। आत्मदर्शनस्य विकासाय योगविद्यायाः महत्त्वपूर्णं स्थानं विद्यते।

निष्कर्षत्वेनेदं स्पष्टं भवति यत् सम्पूर्णमानव-विकासाय योगसाधना परमावश्यकी वर्तते। भारतीय-संस्कृतौ 'योग' एव धर्मः अस्ति। एवं च धर्मः एव परमं तपो वर्तते। अतः सर्वदा योगाभ्यासः करणीया अत्र सन्दर्भेऽस्मिन् उक्तमपि-

**''भवतापेन तप्तानां योगो हि परमौषधम्।।''**

(गरुड़ पुराण)

**अनुसंधाता**
**( राजकीय अध्यापकः शिक्षाविभागः )**
**व्याकरणाचार्यः, शिक्षाचार्यः, एम.ए. अंग्रेजी**
**प्राकृति चिकित्सकः ( NDDY )**

# पाणिनीयगणपाठस्य वैशिष्ट्यम्

❑ अभिमन्यु मीणा

समुपलब्धव्याकरणेषु पाणिनीयव्याकरणस्य महत्त्वं सर्वैरपि विद्वद्भिरङ्गीक्रियते। पाणिनीयं व्याकरण-मकालकं निगद्यते। सूत्राणां सर्वव्यापकत्वं लघिमा, विषयप्रतिपादकत्वमेवास्य महत्त्वं प्रकटयति। समूहच्छब्दराशेः लघुभिः सूत्रैः समग्रव्याख्यानमेव पाणिनीय-व्याकरणस्योपलब्धिरत एवैतत्समक्षम् प्राचीनव्याकरणानि नामत एवावशिष्टानि न तु स्वरूपतः। सूत्राणां सुबोध्यता, विषयस्य क्रमबद्धता, प्रस्तुतीकरणस्य वैज्ञानिकत्वम्, सम्पूर्णता चास्य व्याकरणस्य विशेषतासु अन्यतमाः विद्यन्ते। अत्र प्रदत्ताः प्रत्याहारव्यवस्था, संज्ञाव्यवस्था, अनुवृत्तिसरणिः, विषयस्य सरलीकरण-व्यवस्था चास्य महनीयतां प्रतिपादयन्ति।

भगवता पाणिनिना व्याकरणातिरिक्तं तत्पूर्तये अन्येऽपि ग्रन्थाः विरचिताः। ते हि धातुपाठ-गणपाठ-लिङ्गानुशासन-फिट्सूत्र-परिभाषापाठसंज्ञकाः सन्ति। केषाञ्चिन्मते सूत्राण्यपि पाणिनिना प्रोक्तानि। अत्रावधेयम् यत् यत्साहित्यं हि पञ्चधा दृष्टं प्रोक्तम् उपज्ञातं कृतं व्याख्यातञ्च। तत्र दृष्टं नाम प्रतिभाशक्त्या ज्ञानविषयी-कृतं विद्यमानवाङ्मयम्। यथा वेदमन्त्राः ऋषिभिः दृष्टा न तु प्रणीताः। पाणिनिना अपि तथ्यमिदं स्वीकृतम्। ''**दृष्टं साम**''[1] इति सूत्रद्वारानेन साम्नां दृष्टत्वमेवोररीकृतम्।

द्विविधं शास्त्रं प्रोक्तम्। प्रोक्तमुपदिष्टमिति। पाणिनिना ''**तेन प्रोक्तम्**''[2] इति सूत्रेण निगदितम्। उपज्ञातम् इति ग्रन्थप्रवक्त्रा स्वमनीषिकया विज्ञातम्। तत्र विद्यमानं वा प्रकल्पितमपि। पाणिनिना एतत् ''**उपज्ञाते**''[3] इति सूत्रे बोधितम्।

पाणिनीयं व्याकरणमुपज्ञातम् इत्युच्यते। धातुपाठा-दयः प्रोक्ताः कथिताः। ते हि पाणिनिना व्याकरणसूत्र-व्याख्यानावसरे प्रोक्ताः। गणपाठोऽपि अत्र प्रोक्त एव समायाति। यद्यपि धातुपाठोऽपि गणपाठ एव धातवोऽपि भ्वादिप्रभृतिगणेषु परिगणितत्वात्। तथापि योगरूढेन प्रातिपदिकं पाठ एव गणपाठनाम्ना व्यवह्रियते। संख्यानार्थकाद् गणधातोर्निष्पन्नो गणशब्दः ''**संख्येय**'' शब्दबोधकः। गणसमूहसमुदायेष्वयमेव भेदो यद्गणे पौर्वापर्यस्य कोऽपि विशिष्टक्रमो भवति समूहे वा समुदाये नैव। तेन क्रमविशेषेण पठितानां शब्दानां पाठ एव गणपाठ इतीरितः। लाघवप्रयास एव गणपाठस्य कारणम्।

प्राक्काले सूत्रव्याख्यातार एव धातुपाठगणपाठा-दीनामपि प्रणेतारोऽप्यासन्। पाणिनिनाऽपि एषा सरणिरनुसृता किन्त्वत्र वैमत्यमपि प्राप्यते केषाञ्चिन्मते सूत्रकारः अन्यः गणकारश्चान्यः। सम्प्रति गणपाठस्य व्यवहार अध्ययनाध्यापनयोर्नास्ति। अनेन गणपाठस्य परम्परैव समाप्ता।

गणपाठस्य पाणिनीयव्याकरणे महत्त्वं वीक्ष्य सिद्धान्तकौमुद्यां गणपाठस्य पृथक् सङ्कलनं कृतम्। अत्र सामाजिक्यार्थिकी दशा अप्रत्यक्षतः प्रत्यक्षतो वा बोधिता विद्यते। गणपाठादीनां पाणिनीयव्याकरणे अत्यन्तं लघुता सूक्ष्मता वा समायाता।

गणपाठेषु द्वितीयाध्यायस्य प्रथमे पाठे तिष्ठद्गु-प्रभृतीनि चेति सूत्रं पठितम्। अत्र निर्दिष्टप्रयोगैः तिष्ठद्गु, वहद्गु, आयतीगवम्, खलेयवम्, खलेबुसम्, लूनयवम्, लूयमानयवम्, पूतवयम्, पूयमानयवम्, संहितयवम् संह्रियमाणयवम्, संहितबुसम् संह्रियमाण-बुसम्[4] प्रभृतिभिः शब्दैः पाणिनिकालिनी कृषिव्यवस्था बोधिता विद्यते।

1. अष्टा. 4/2/7 2. अष्टा. 4/3/101 3. अष्टा. 4/3/115

4. अष्टा. 2/1/17

''**सप्तमी शौण्डैः**''[5] इत्यस्मिन् सूत्रे पाणिनिकालिकसमाजस्य धूर्तपण्डितादीनां संग्रहणं कृतं विद्यते तद्यथा-शौण्डः, धूर्तः कितवः व्याड इमे शब्दाः धूर्तवाचकाः सन्ति तथा च प्रवीण-संवीतपटु-पण्डित-कुशल-निपुणशब्दैः समाजे विद्यमान पण्डितजनानां संबोधो जायते।

''**पात्रेसमितादयश्च**''[6] इत्यस्मिन् सूत्रे सङ्गृहीत-शब्दान् अवलोक्य कथयितुं शक्यते यत् सामाजिक-जीवनस्य सर्वान् पक्षान् पाणिनिः जानाति स्म तद्यथापात्रे समिताः, पात्रे बहुलाः उदुम्बरमशकः, उदुम्बरकृमिः कूपकच्छपः, कूपमण्डूकाः, कुम्भमण्डूकः, उदपान-मण्डूकः, नगरकाकः, नगरवायमसः, मातरिपुरुषः, पिण्डीशूरः, गेहेशूरः, गेहेनर्दी, गेहेक्ष्वेडी, गेहेविजिती, गेहेव्याडः, गेहेमेही, गेहेदाही, गेहे दृप्तः, गेहेधृष्टः, गोष्ठेशूरः, गोष्ठेविचिती, गोष्ठेपटुः, गोष्ठे पण्डितः गोष्ठे प्रगल्भः, इत्यादयः शब्दाः मानवजीवनस्य व्यावहारिक-पक्षमेव द्योतयन्ति।

''**उपमितं व्याघ्रादिभिः सामान्याप्रयोगे**''[7] इत्यस्मिन् सूत्रे काननपशूनां सङ्कलनं सम्यक् कृतं विद्यते यथा-व्याघ्रः सिंहः, ऋक्षः, ऋषभः, वृकः, वृषः, वराहः, हस्तिन्, कुञ्जरः, रुरु, पृषत्। इमे शब्दाः वनपशूनां बोधकाः शब्दाः विद्यन्ते।

पाणिनीयगणपाठे मानवजीवनोपयोगिभूतानां सर्वेषां पक्षाणां समग्रतया सङ्कलनं कृतं विद्यते। गणपाठं विना पाणिनीयशब्दानुशासनमपूर्णमिति कथयितुं शक्यते। गणपाठस्य अध्ययनं विना पाणिनीयाष्टाध्याय्यां तादृशी गतिर्न भवितुमर्हति यादृशी अपेक्षा भवति। गणपाठस्य वैशिष्ट्यं महत्त्वञ्चावेक्ष्य निगदितुं शक्यते यदि अध्ययना-ध्यापनयोः पृथग्रूपेण सार्थं गणपाठस्य व्यवहारो भवेत्तदावश्यमध्येतृणां कल्याणं भविष्यतीति दिक्।

**शोधार्थी**
**ज.रा.रा.संस्कृत विश्वविद्यालयः, जयपुरम्**

5. अष्टा. 2/1/40 6. अष्टा. 2/1/48 7. अष्टा. 2/1/56

# समस्यापूर्तिः सदाचारवन्तः

❑ **बद्रीप्रसादशर्मा**
**वरिष्ठ संस्कृताध्यापकः**

**कदाचारहीनाः, सदाचारलीनाः।**
**विवेकैः सुरक्ताः, सदाचारवन्तः।। 1।।**

**विरक्ताः हि पापैः, सुपुण्येऽनुरक्ताः।**
**सदाचारनिष्ठाः, सदाचारवन्तः।। 2।।**

**विसन्तापहीनाः सुसन्तः प्रसन्नाः।**
**विचारैः विशिष्टाः सदाचारवन्तः।। 3।।**

**सुकर्तव्यशीलाः सुसंकल्पमानाः।**
**सुनीथा सुवाणी, सदाचारवन्तः।। 4।।**

**अविद्यास्वलीनाः, सुविद्याविलीनाः।**
**विकासाय युक्ताः सदाचारवन्तः।। 5।।**

**अनाचारयुक्ताः, जनास्ते विपन्नाः।**
**लभन्ते सुकीर्तिम्, सदाचारवन्तः।। 6।।**

**सुश्रेष्ठाः सुपूज्याः, शुभा धर्मशीलाः।**
**सदाचारविज्ञाः, सदाचारवन्तः।। 7।।**

**सुशास्त्रप्रवीणाः, जनास्तेहि धन्याः।**
**भवेयुस्समस्ताः, सदाचारवन्तः।। 8।।**

**सुकल्याणदक्षाः, परेषां निमग्नाः।**
**भवेयुस्समस्ताः, सदाचारवन्तः।। 9।।**

**सदा स्वस्ति पन्था, जनास्तेऽनुरक्ताः।**
**सदाचारशोभा, सदाचारवन्तः।। 10।।**

**64, महावीर कॉलोनी, जालियारो,**
**ब्यावर, जिला-अजमेरः**

# ज्योतिर्विद्या योगशास्त्रञ्च

❑ नवनीतकुमारः

भारतीयविद्याः समग्रतापोषकाः सन्ति। अतः सर्वेषु शास्त्रेषु मिथः घनिष्ठसम्बन्धः। एतानि शास्त्राणि परस्परं मालावद्गुम्फितानि। अनेनैव कारणेन एकं शास्त्रम् समग्रतया अधिगन्तुम् अन्येषां शास्त्राणामपि आवश्यकता भवति। वेदैः सार्द्धं सर्वेषां शास्त्राणामपि अध्ययनम् एतद्धि गौरुकौलिकी शिक्षापद्धतिः। गुरुकुलस्य स्नातक एव आचार्यतां यातिस्म, कस्मिंश्चिदपि शास्त्रे च साधिकारलेखनस्य साहसं च करोति स्म। तेषामेव आचार्याणां परम्परया सुरक्षितानि सर्वाणि शास्त्राणि अद्य अस्माभिरध्ययनार्थं सुलभानि सन्ति। यद्यपि शास्त्राणां प्रतिपाद्यविषयः पृथक्-पृथक् भवति किन्तु लक्ष्यज्ञानं तस्मात् कैवल्यं चैवास्ति। इत्थमेव एतादृशान्यपि शास्त्राणि येषां लक्ष्यं कैवल्यं तु भवत्येव सांसारिकसुखमपि भवति। एषु शास्त्रेषु त्रीणि प्रमुखानि-ज्योतिषम्, आयुर्वेदः योगश्चेति। इमानि त्रीणि शास्त्राणि विद्या अविद्याः भौतिकसुखदुःखानि शारीरिकमानसिक-प्रवृत्तीश्च निरूपयन्ति।

कालविधानशास्त्रभूतत्वात् ज्योतिः शास्त्रस्य भूमिका सर्वप्रथमतया स्वीक्रियते। ज्योतिषं जीवस्य पूर्वजन्मा-र्जितकर्मविपाकनिरूपणेन साकम् आधानकालं तस्मात् च प्रसवकालं प्रवसकालाच्च मरणपर्यन्तं समस्तगतिविधीन् विवेचयति। आयुर्वेदः गर्भस्थशिशोः विकासाय प्रसवोत्तरशरीरस्य सुरक्षार्थं पुष्ट्यर्थं च औषधीः विविनक्ति। एवमेव योगस्य भूमिकापि बाल्यकालादेव आरभ्यते। मनुष्यस्य मनसः बुद्धेः पाञ्चभौतिकशरीररस्य च क्रियाणां नियन्त्रणस्य कार्यं योगशास्त्रं करोति। नैकेषु विन्दुषु त्रयाणां शास्त्राणां विचारसरणिः समानैव दृश्यते। प्रस्तुतप्रसङ्गे ज्योतिषयोगशास्त्रयोः मिथः सम्बन्धे यथामति विचार्यते।

**ज्योतिषयोगशास्त्रयोः सम्बन्धः**

ज्योतिषशास्त्रेण आयुर्वेदेन च प्रथ्यते यत् मनुष्यस्य सुख-दुःखानि न केवलम् इहजीवनकर्माश्रितानि अपितु पूर्वजन्मकर्माश्रितान्यपि भवन्ति, यतोहि पूर्वजन्मार्जित-कर्मणां परिपाका एव अस्मिन् जन्मनि फलीभूतानि भवन्ति। ज्योतिषशास्त्रेण तानि कर्मफलानि तथैव दृश्यन्ते तथा अन्धकारे दीपकप्रकाशेन वस्तूनि। यथा च वराहमिहिरः -

**यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मणः पङ्क्तिम्।**
**व्यञ्जयति शास्त्रमेतत् तमसि द्रव्याणि दीप इव।।**[1]

व्याधिनिरूपणं कुर्वता आयुर्वेदेनापि अयं सिद्धान्तः सङ्केतितः। व्याधीनां प्रकारद्वयं तत्रोक्तं यथा-

**कर्मजा व्याधयः केचित् दोषजाः सन्ति चापरे।**[2]

अर्थात् केचित् व्याधयः कर्मजा भवन्ति एषां सम्बन्धः पूर्वजन्मनः इहजन्मनश्च कर्मभिर्भवति। तथा केचित् व्याधयः दोषजा भवन्ति एषां सम्बन्धः वात-पित्त-कफादि दोषत्रयैः आहार-विहारजन्यदोषैश्च भवति। भिषगाचार्यस्य अयमेव भावः ज्योतिषशास्त्रस्यापि -

**पूर्वजन्मकृतं पापं व्याधिरूपेण जायते।**[3]

अतः द्वाभ्याम् एव शास्त्राभ्यां पूर्वजन्मकर्ममहत्त्वं प्रतिपादितं येन स्पष्टत्वेन ध्वन्यते यत् कर्म एव मनुष्यस्य ह्रासवृद्धिकारणं सुखदुःखकारणं च भवति। एतदेव पुष्यन्त्या वृद्धसूर्यारुणकर्मविपाकसंहितया प्रोक्तम् -

1 लघुजातकम् 1/3
2 च.सं. 2/40
3 प्रश्नमार्ग 13/38

**कर्मणा नरकं सूतं स्वर्गे याति च कर्मणा।**
**देवत्वमाप्नुयाज्जीवो राक्षसत्वं च कर्मणा।।**
**कर्मणा बन्धमायाति मोक्षमायाति कर्मणा।**
**कर्मणा पतनोच्छ्रायौ नृणां जन्मनि जन्मनि।।**[4]

एतेन ज्योतिषस्य कर्ममहत्त्वप्रतिपादतित्वमपि सूच्यते। वस्तुतः ज्योतिषस्य आधारशिला कर्मवादः आकाशीय-ग्रहाश्च सन्ति। सर्वे आकाशीयपिण्डाः परस्परं प्रभाविताः भवन्ति। तेषु पृथ्वीमार्गे आयातानां नक्षत्राणां ग्रहाणां च प्रभावः भूवासिभिः विशेषरूपेण महर्षिभिः स्वीयदिव्यज्ञानेन अनुभवेन प्रयोगेण च ज्ञातः, येषां विवेचनं ज्योतिषस्य फलितशास्त्रे संहिताग्रन्थेषु च विस्तृतरूपेण कृतम्। ऋषीणां दिव्यज्ञानप्राप्तनैकविषय-मूलकारणानि अस्माभिः प्रायेण नैवावगम्यन्ते। अतः अद्यावधि पर्यन्तम् अस्माभिः नैकफलितसूत्राणां उपपत्तिः अव्याख्येयास्ति। अत्र केवलं परिणाम एव उपपत्तिः, यथा च सिद्धान्तग्रन्थेषु अपि केषुचित् प्रसङ्गेषु प्रोक्तं - **अन्नोपलब्धिरेव वासना।**

अन्तरिक्षानुसन्धाने संलग्नवैज्ञानिकानां शोधोपलब्धिभिः अपि प्राचीनज्ञानस्य रहस्यं शनैः-शनैः ईषद् अवगम्यते। यतोहि अत्र केषाञ्चित् रहस्यात्मकबिन्दूनां चर्चा प्रसङ्गान्तरस्य विस्तारस्य च कारणीया भविष्यति। अतः ज्योतिषस्य केवलं त एव विषयाः प्रकाश्यन्ते येषां सम्बन्धः योगशास्त्रेण अस्ति।

### ज्योतिषशास्त्रे आत्मा-मनःकारकयोः रविचन्द्रयोः प्राधान्यम्

सर्वविदितमेव यत् सूर्यस्य प्रमुखाः सप्तरश्मयः भवन्ति। येषां भारतीयनामानि क्रमशः-सुषुम्ना, हरिकेश, विश्वकर्मा, विश्वव्यचा, संयद्वसु, सर्वावसु, सुराट् (स्वराड्) च सन्ति। एषु रश्मिषु सुषुम्ना चन्द्रमसं प्रकाशयति तस्माच्च परावर्तितीभूय भूतले अमृतं स्त्रवति। ज्योतिषे सूर्यः आत्मकारकः- **'सूर्यआत्मा जगतस्तथुषश्च**[5]**'** चन्द्रमा च मनसः कारकः - **'आत्मा रविः शीतकरन्तु चेतः**[6]**'**। चन्द्रस्य स्थित्यनुसारं मनसः स्थितिर्भवति। मनोबुद्धिकारणेनैव मानसिकानि शारीरिकाणि च परिवर्तनानि जायन्ते। अनेन न केवलं मानवः अपितु समस्तचराचराः प्रभाविताः भवन्ति। चन्द्रं दृष्ट्वा समुद्रे जायमानः हर्षः अस्य ज्वलन्तोदाहरणम्। यथा सूर्यचन्द्रमसोः स्थितिविशेषेण समुद्रे उद्वेगविशेषो भवति। तथैव प्रत्येकं मनुष्यः स्वजन्मलग्नराशिवशात् चन्द्रराशि-वशात् सूर्यराश्यनुसारं च प्रभावितो भवति, अस्य विवेचनं ज्योतिषशास्त्रे लभ्यते। मनोऽवस्थायाः मूले मानसिक-रोगाणां च मूले सूर्यचन्द्रराहूणां विभिन्नस्थितयः एव कारणीभूताः। मनसः शान्तिकरणाय आध्यात्मिकानां भौतिकसाधनानां चापि निर्देशः कृतः।

### योगशास्त्रे आत्म-मनःकारकयोः रविचन्द्रयोः प्राधान्यम्

योगशास्त्रमपि आत्म-मनः-शरीरादीनां नियन्त्रण-प्राधान्यपरकं वर्तते। योगस्य प्रथमं सोपानं मनसः नियन्त्रणमेव अस्ति। यथा प्रोक्तम्- **योगश्चित्तवृत्ति-निरोधः**[7]। मन अत्यन्तचञ्चलं वर्तते काठिन्येन च नियन्तुं शक्यते। यथा च गीतायां-

**चञ्चलं हि मनः कृष्ण प्रमाथि बलवद् दृढम्।**
**तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्।।**[8]

मनोनियन्त्रणमपि ग्रहस्थितिषु एव निर्भरम् अस्ति। संसारे अनेके मानवाः मनो नियन्तुं यतन्ते तथा सफला

4 कर्मविपाकसंहिता 1/8-9

5 ऋक् 13/2/35

6 बृहज्जातकम् 1/

7 पातञ्जलयोगसूत्राणि 1/2

8 गीता 6/34

अपि भवन्ति, एवमेव एतादृशाः मनुष्याः अपि भवन्ति ये प्रयासं तु कुर्वन्ति किन्तु सफलाः न भवन्ति। एवमेव अपरे मनुष्याः मनः प्रवाहेण सह आनन्दम् अनुभवन्ति। एतत् प्रकारकप्रवृत्तीनामध्ययनं ज्योतिषशास्त्रेण सरलतया कर्तुं शक्यते। शरीरस्य मनसश्च सम्बन्धः शरीरस्थनाडीभिः शरीरव्याप्तभेदैरप्यस्ति अस्यापि निरूपणं ज्योतिषे योगे चोभयोरपि कृतम्। योगानुसारेण शरीरे दशनाड्यः सन्ति। तासु च दशप्रकारकवायूनां सञ्चारो भवति। ज्योतिषेनापि यथावत् एतत् स्वीक्रियते तथा अनेनैव सार्धं सूर्यचन्द्रमसोः सम्बन्धोऽपि निरूप्यते। यद्यपि सुषुम्नानामकरश्मेः सम्बन्धः चन्द्रेण सह अस्ति किन्तु सुषुम्ना-नाड्याः सम्बन्धः चन्द्रेण साकं प्रकारान्तरेण सिद्ध्यति। अस्माकं शरीरे स्थिरदशनाडीनां तथा तत् प्रवहमानदशवायूनां वर्णनम् अस्मिन् चक्रे क्रियते –

नाडी-वायुबोधक चक्रम्

| क्र.सं. | नाडी | वायु | क्र.सं. | नाडी | वायु |
|---|---|---|---|---|---|
| 1 | इडा | प्राण | 6 | पूषा | नाग |
| 2 | पिङ्गला | अपान | 7 | यशा | कूर्म |
| 3 | सुषुम्ना | समान | 8 | व्यूषा | कृकल |
| 4 | गान्धारी | उदान | 9 | कुहू | देवदत्त |
| 5 | हस्तिजिह्विका | व्यान | 10 | शंखिनी | धनंजय |

आसु दशनाडीसु इडापिङ्गलासुषुम्नानाडीनां कार्याणि अस्माभिः सारल्येन परिचीयन्ते यतोहि आसां क्रियाणा-मनुभवं वयं स्वदिनचर्यायां कुर्मः। इडायाः सम्बन्धः चन्द्रेण, पिङ्गलासम्बन्धः सूर्येण, सुषुम्नायाः सम्बन्धः शम्भुना चास्ति। शम्भुः हंसोऽप्युच्यते। एते सम्बन्धाः ज्योतिषशास्त्राङ्गभूते स्वरविभागे इत्थं निरूप्यन्ते-

**इडानाडीस्थितश्चन्द्रः पिङ्गला भानुवाहिनी।**
**सुषुम्ना शम्भुरूपेण शम्भुर्हंसस्वरूपकः।।**[9]

9 नरपतिजयचर्या. हंसाचारप्रकरणम् 9

अस्याशयस्तु स्पष्ट एव। इडा नाडीमाध्यमेन सूर्यस्वरः नासिकारन्ध्रात् प्रवहति। अस्याः प्रक्रियायाः सञ्चालनं सुषुम्नामाध्यमेन भवति। सुषुम्ना एव शम्भुस्वरूपा उक्ता। शम्भुरेव हंसः श्वासानाम् आवागमनमेव हंस इत्युच्यते। यदा नासिकायाः श्वासः बहिरागच्छति। तदा सः सहकारो भवति एवं यदा अन्तर्गच्छति तदा असावेव सकारस्वरूपः भवति। इयमेव सुषुम्ना हकारेण शम्भुः सकारेण शक्तिश्च प्रोच्यते। योगी श्वासानां निर्गमनं प्रवेशं च शिवशक्तिभ्यां युनक्ति। श्वासानां गमनागमनाभ्यां जपोऽपि भवति। अयं जपः 'अजपाजपः' उच्यते। अयं जपः स्वयमेव भवति। अस्मै न कस्यापि साधनस्य अन्यस्य अपेक्षा। योग-चूडामण्युपनिषदि तथा ध्यानबिन्दूपनिषदि च प्रोक्तम्-

**हकारेण बहिर्याति सकारेण विशेत्पुनः।**
**हंसहंसेत्यमुं मन्त्रं जीवो जपति सर्वदा।।**[10]

यथा ब्रह्माण्डे सूर्यस्य सुषुम्नारश्मिः चन्द्रमण्डलात् भूमण्डले अमृतं स्रावयति तथैव सुषुम्नानाडी कपाले स्थित्वा अमृतं स्रावयति। योगी स्वजिह्वां कपालकुहरे प्रविश्य अमृतपानं करोति। इयं खेचरीमुद्रा कथ्यते। अस्याः विवेचनं हठयोगप्रदीपिकायाम् अस्ति-

**कपालकुहरे जिह्वा प्रतिष्ठा विपरीतगा।**
**भ्रुवोरन्तर्गता दृष्टिर्मुद्रा भवति खेचरी।।**[11]

उक्तविवेचनेन स्पष्टीभवति यत् सुषुम्नानाड्याः सम्बन्धः सूर्येण चन्द्रेण चोभाभ्यामेव अस्ति। सुषुम्नामाध्यमेन इडा नाडी चन्द्रशक्तिं श्वासमाध्यमेन नासिकावामरन्ध्रतः तथा पिङ्गलानाडी सूर्यशक्तिः दक्षिणरन्ध्रतः प्रवहतः। ज्योतिषभाषायां अयं चन्द्रस्वरः सूर्यस्वरश्च परिभाष्यते।

10. ध्यानबिन्दूपनिषद्

11. ह.यो.प्र. 3/32

प्राय: अयमपि सर्वविदित: यत् तिथीनां तथा चन्द्रकलानां सम्बन्धोऽपि सूर्यचन्द्राभ्यामेवास्ति। चान्द्र-मासस्य शुक्लपक्षे तिथीनामनुसारं चन्द्रकला: प्रतिदिनं वर्धन्ते कृष्णपक्षे च तिथीनामनुसारं क्षीयन्ते किन्तु चन्द्रसूर्यस्वरेषु नेत्थं ह्रासवृद्धिक्रम:। भूवासिभि: चन्द्रकलासु ह्रासवृद्धी केवलं प्रतीयेते। वस्तुत: चन्द्रस्य प्रकाशितभागेऽपि ह्रासो वृद्धिर्वा न भवति। तिथ्यनुसारम् एषां प्रवाहक्रम: इत्थं वर्तते –

प्रत्येकं मासस्य शुक्लपक्षस्य प्रतिपदात: आरभ्य तृतीयापर्यन्तं सूर्योदयस्य समये चन्द्रस्वर: तत: चतुर्थीतिथे: आरभ्य षष्ठीपर्यन्तं सूर्योदयसमये सूर्यस्वर: चलति। इत्थमेव त्रयाणां दिनानां क्रमानुसारेण चन्द्रस्वर: सूर्यस्वरश्च चलत:। अर्थात् शुक्लप्रतिपदाया: तृतीयापर्यन्तं सप्तम्या: नवमीपर्यन्तं, त्रयोदश्या: पूर्णिमापर्यन्तं सूर्योदयस्य समये चन्द्रस्वर: अर्थात् वामनासिकात: श्वास: प्रवहति। कृष्णपक्षे तु एतत् विपरीत: स्वरसञ्चार: अर्थात् कृष्णप्रतिपदाया: तृतीयापर्यन्तं सूर्योदयसमये सूर्यस्वर: पश्चात् त्रिषु दिवसेषु चन्द्रस्वर: अनेनैव क्रमेण निरन्तरं स्वर: सञ्चर्यते। चन्द्रस्वरसमये यदि सूर्यस्वर: सञ्चरति सूर्यस्वरसमये चन्द्रस्वरश्च चेत् चलति तदा शरीराय शकुनदृष्ट्या शुभं नैव मन्यते। इत्थमेव श्वाससम्बन्ध: पञ्चमहाभूतै: सह दर्शयता अहोरात्रे प्रचलन्ती श्वासप्रक्रिया (हंसचार:) विस्तृत-रूपेण परिभाषिता। हृदये अष्टदलकमलस्य कल्पना कृता प्रत्येकं कमलदलस्य भागद्वयं भवति। एकस्मिन् भागे पञ्चतात्वानां पृथक् पृथक् श्वास: नियमेन अवरोहक्रमेण चलति। श्वासानां तात्वक्रमसंख्या तथा पर्यायसन्दर्भे स्वरज्योतिषग्रन्थे समरसारे चोक्तम्-

**नागैर्नीचैर्निधिङ्गाश्रयनशुकमितै: श्वासपर्यायकैर्वा-त्यभ्रं वातोऽनलोम्बुक्षितिरपृथगुपर्यन्तराधोऽप्यऋजुत्वे। व्यत्यासाच्चावनीतो हृदयकमलजे यत्र एकत्र तेन श्वासा नानाधिसंख्याननरसकमलेऽहर्निशोस्त्रिभ्रमोऽत्र।।**[12]

आशयोऽयमस्ति यत् अष्टदलकमलस्य अर्धभागे आरोहक्रमेण सर्वप्रथमं 30 श्वासा: आकाशतत्त्वस्य अनन्तरं 60 श्वासा: वायुतत्त्वस्य, अनेनैव क्रमेण 90 श्वासा: अग्नितत्त्वस्य 120 जलतत्त्वस्य तथा 150 पृथ्वीतत्त्वस्य चलन्ति। अनन्तरं पत्रस्य द्वितीयभागे अवरोहक्रमेण 150 श्वासा: पृथ्वीतत्त्वस्य 120 जलतत्त्वस्य 90 अग्नितत्त्वस्य 60 वायुतत्त्वस्य 30 आकाशतत्त्वस्य च चलन्ति। पूर्वादिक्रमेण सर्वेषु पत्रेषु श्वाससञ्चारसंख्या (30+60+90+120+150 = 450 आरोह: तथा 450 अवरोह: आहत्य) = 900 भवन्ति। एषां पञ्चतत्त्वानां 900 श्वासानां सञ्चारे सार्धद्वयघटी अर्थात् 1 घण्टात्मक: काल: भवति। तथा 8 X 900 = 7200 श्वासानां सञ्चार: एकस्मिन् पर्याये भवति। एकस्मिन् अहोरात्रे त्रय: पर्याया: भवन्ति। अत: एकस्मिन् अहोरात्रे श्वाससञ्चार: 7200 X 3 = 21600 बारं भवति। यदि सर्वेषां तत्त्वानां श्वाससंख्या उक्तक्रमानुसारेण चलति तथा 24 घण्टासु 21600 श्वासानां सञ्चार: भवति, तदा मनुष्य: पूर्णतया स्वस्थ: आयुष्मान् च भवति।

अयं हंसचार: नरपतिजयचर्यायां विभिन्नशैल्या प्रस्तुत: तत्र श्वाससंख्यानां उल्लेखस्तु नास्ति अपितु समयस्य लक्षणानां च विवेचनमस्ति नरपतिकथनमस्ति यत् प्रत्येकं तत्त्वस्य प्रत्येकं घटी श्वास: चलति तथा प्रत्येकं स्वरस्य एकस्मिन् अहोरात्रे द्वादशपर्याया: चलन्ति अर्थात् 60 घटीषु 5 तत्त्वानां 12 पर्याया: = 12 X 5 = 60 चक्रे प्रत्येकं तत्त्वस्य श्वासा: चलन्ति। यद्यपि द्वयो: मतयो: विचारप्रतिपादनस्य आधार: भिन्न:। समरसारग्रन्थे श्वासस्य संख्याया: तथा नरपतिजयचर्यायां कालस्य विवेचनमस्ति। द्वयोरेव श्वाससञ्चार एव महीयते। तत्त्वानां सापेक्षं श्वासनियन्त्रणमपि योगस्यैव अङ्गमस्ति।

12. समरसार: हंसचारप्रकरणम् 39

योगस्य परमसाधना षट्चक्रभेदनमस्ति। साधनायां लीनः साधकः कदाचित् प्रयासानन्तरमपि न सफली- भवति। केषाञ्चित् साधकानां निर्बाधा भवति। अस्मिन् ग्रहाणामपि योगदानं भवति। अत्र षट्चक्रतालिका प्रदर्श्यते-

**षट्चक्रतालिका**

| क्र.सं. | षट्चक्रम् | अधिष्ठातृ देवता | कारकग्रहः |
|---|---|---|---|
| 1 | मूलाधारम् | गणेशः | बुधः |
| 2 | स्वाधिष्ठानम् | विष्णुः | शुक्रः |
| 3 | मणिपूरम् | रुद्रः | रवि |
| 4 | अनाहतम् | रुद्रः | मङ्गलः |
| 5 | विशुद्धम् | रुद्रः | चन्द्रः |
| 6 | आज्ञा | रुद्रः | गुरुः |

षट्चक्रभेदानन्तरं योगी सप्तमचक्रे सहस्रारे प्रविश्य परमयोगीश्वरस्य रुद्रस्य साक्षात्कारं करोति। अस्य चक्रस्य देवता रुद्रः तथा कारकग्रहः शनिः अस्ति। एषु षट्चक्रेषु स्वाधिष्ठानस्य विशुद्धस्य च भेदनं कठिनं भवति। यतो हि अनयोः द्वयोः कारकग्रहौ शुक्रचन्द्रौ स्तः तौ शीघ्रगामिनौ स्तः तथा मानवमनः संवेदनशीलं कुरुतः। अतः मनसः एकाग्रतायां बाधा जायते तथा साधना रुध्यते। परिणामतः कदाचित् अनयोः चक्रयोः गत्या साधनाभङ्गोऽपि भवितुं शक्यते। यो योगी ग्रहयोगानाम् अनुकूलतानुसारं तथा स्वकठोरसाधनया विशुद्धचक्रं भिनत्ति, सः आज्ञाचक्र- भेदनमपि गुरुकृपया सारल्येन कर्तुं शक्नोति, यतो हि आज्ञाचक्रस्य कारकग्रहः गुरु एव अस्ति। गुरुकृपा- प्राप्त्यनन्तरं सहस्रारचक्रे प्रवेशद्वारं अनावृतं भवति।

एतैः तथ्यैः सिद्ध्यति यत् ज्योतिषस्य योगस्य च धारा एकीभूय एव प्रवहति, योगसाधनायां ज्योतिष- सहयोगः अपेक्षितः, तथैव ज्योतिषाय अपि एकाग्रतायाः आवश्यकता, एकाग्रता च मनोनियन्त्रणं विना न प्राप्यते। मनोनियन्त्रणमेव योगः।

ज्योतिषस्य महत्त्वपूर्णः व्यावहारिकश्च पक्षः अयमप्यस्ति यत् समयात्पूर्वं यदि कस्यचिद् व्यवधानस्य व्याधेः दुर्घटनायाः वा पूर्वज्ञानं भवेत् तदा व्यक्तिः तत् प्रति सावधाना भवति। पूर्वज्ञानेन मनुष्यः समस्याप्रतिकाराय समाधानाय वा सचेष्टो भवति। अतः एतत् सुसिद्धमेव यत् ज्योतिषः योगश्च इत्येते द्वे चापि शास्त्रे मानवकल्याण- शास्त्रेण तथा मानवजीवनेन सार्धमेव चलतः।

**शोधच्छात्रः**
**राष्ट्रियसंस्कृतसंस्थानम्, दिल्ली**

**ऐसे बन सकते है आप भारती पत्रिका के ग्राहक :-**

भारती पत्रिका का वार्षिक शुल्क रुपये 120/-, पंचवर्षीय शुल्क 500/-, आजीवन सदस्यता (15 वर्ष) शुल्क 1500/- मात्र है। आप केनरा बैंक की किसी भी शाखा में जाकर हमारे निम्नलिखित खाते में राशि जमा करा कर जमा रसीद की फोटो प्रति ई-मेल से या डाक द्वारा भिजवा देवें।

खाते का नाम – **भारती**

खाता संख्या – **2139101912502**

**IFS Code - CNRB0002139**

नारी-स्तम्भः

# कविकर्मकुशला-कृष्णा सोबती

❑ डॉ. राजेश्वरी भट्ट

महद्गौरवस्य विषयोऽयं वर्तते यत् 2017 तमे वर्षे साहित्यक्षेत्रे प्रदीयमानस्य 'ज्ञानपीठ' इति राष्ट्रस्य सर्वोच्चपुरस्कारस्य कृते प्रगतिशीलचिन्तनस्य प्रेरिकायाः, संघर्षशीलाया हिन्दीभाषाया उत्कृष्ट-लेखिकायाः 'कृष्णा सोबती' महाभागाया नाम निर्णायकमण्डलेन सर्वसम्मत्या समर्थितम्। हिन्दी साहित्यक्षेत्रे विविधासु विधासु सशक्तं सरसं सार्थकञ्च लेखनं कुर्वती 'कृष्णा सोबती' इदानीं राष्ट्रस्य वरिष्ठा लेखिका वर्तते। आत्मनः सशक्तलेखनेन राष्ट्रे अनेकैः साहित्यसंस्थानैः सम्मानिता 92 वर्षदेशीया 'कृष्णा सोबती' 18 फरवरी 1925 तमे वर्षे सम्प्रति पाकिस्तान-देशे स्थिते गुर्जरप्रान्ते जनिमलभत। कश्मीरप्रदेशस्य पर्वतानां सन्निधौ स्थितेऽस्मिन् रमणीये स्थले निवसन्ती 'कृष्णासोबती' बाल्यादेव प्रकृते-रुपासिका वर्तते। नतोन्नते पर्वतीयप्रदेशे अश्वारोहणं, पर्यटनञ्च कृष्णायाः सहजकर्म आसीत्। विदुष्याः कृष्णायाः कृतिषु यत्र, तत्र, सर्वत्र प्रकृतिप्रेम प्रतिबिम्बायते। चिनारप्रान्तस्य परिवेशे वर्द्धमानायाः 'कृष्णासोबती' महाभागायाः पिता सिविल सेवायाम् उच्चाधिकारी आसीत्, पुत्र्याः कृते उत्तमशिक्षाया व्यवस्थायै स आत्मनः पुत्र्याः प्रवेशं शिमलानगरस्थे छात्रोत्कर्षाय बहुश्रुते, 'लेडीइरविन' नाम्नि विद्यालये-ऽकारयत्। सर्वसुविधासम्पन्नेऽस्मिन् विद्यालये अभिजातकुलोद्भवैः विभिन्न रुचिसम्पन्नैर्बालकैः सह पठन्त्या बालिका कृष्णाया अन्तर्निहिता बहुमुखी प्रतिभा प्रस्फुटिता जाता। हिन्दीभाषायाः प्रख्यात-रचनाकरो 'निर्मलवर्मा' विद्यालये कृष्णायाः सहपाठी आसीत्। तत उच्चशिक्षां प्राप्तुं कृष्णासोबती लाहौरनगरस्य 'प्रख्याते' फतेहचन्द्र महाविद्यालये प्रवेशं प्राप्तवती। अहं सर्वासु विशिष्टा भवेयम् कृष्णाया इदं चिन्तनम् अस्या वेशभूषायां, व्यवहारे, किमधिकमस्या लेखनेऽपि दृश्यते। देशस्य विभाजनानन्तरं 'कृष्णासोबती' दिल्लीनगरमागतवती। ततः प्रभृति अत्रैव निवसन्ती कृष्णासोबती सततं साहित्यसेवायां संलग्ना जाता। 1950 तमे वर्षे विदुष्या कृष्णया विरचिता 'लामा' इति प्रथमा कथा प्रकाशिताऽभवत्। ततः प्रकाशिता अन्या मित्रो मरजानी, दिलोदानिश, हमहशमत, यारों के यार, सूरजमुखी, जिन्दगीनामा सदृश्यः रचनाः साहित्यक्षेत्रे समसामयिक समस्यानां, नारीणां सामाजिक दशायाश्च दर्शिका वर्तन्ते। मेधाविन्याः कृष्णायाः प्रारम्भिकीषु कृतिषु पंजाबीभाषाया बाहुल्यं दृश्यते। अस्मिन् विषये प्रख्यात हिन्दी लेखकस्य अमृतलालनागरमहोदयस्य परामर्शेन, सतत-श्रमेण अभ्यासेन च कृष्णासोबती प्रायः दशवर्षेषु हिन्दीभाषायां नैपुण्यमधिगम्य अनेकानि समसामयिकानि सामाजिकतथ्यानि उद्घाटयन्तीभिः सशक्ताभिः कृतिभिः लोके विश्रुता जाता। परम्पराणां पद्धतेश्च अतिक्रमणं विदुष्याः कृष्णायाः सहजं चिन्तनं दृश्यते। 70 वर्षाणां वयसि डोगरी भाषाया रचनाकारेण शिवनाथमहोदयेन सह विवाहबन्धनम् अस्याः स्वतन्त्रचिन्तनस्य स्पष्टं प्रमाणं वर्तते। उन्मुक्तेन विशिष्टलेखनेन च कृष्णासोबती राष्ट्रे अनेकैर्दुलभैः पुरस्कारैः सम्मानैश्च सम्मानिता जाता। 1980 तमे वर्षे प्रज्ञावती कृष्णासोबती जिन्दगीनामा इति कृतिमाधारीकृत्य साहित्यअकादम्या सम्मानिता जाता। ततो 1996 तमे वर्षे कृष्णासोबती साहित्यअकादम्या फेलोशिप इति स्पृहणीयां शोधवृत्तिं प्राप्तवती, अनन्तरं 2001 तमे वर्षे इयं हिन्दी अकादमी दिल्लीतः शलाकासम्मानेन सम्मानिता जाता। 2010 तमे वर्षे दुर्लभं 'पद्मभूषण' इति राष्ट्रीयं सम्मानं

**अस्वीकृतवती। सम्प्रति 2017 तमे वर्षे 'ज्ञानपीठ' इति राष्ट्रे साहित्यक्षेत्रे सर्वोच्चसम्मानेन सभाजिता कृष्णा सोबती नारीणां कृते प्रेरणास्रोतो विशिष्टा विभूतिर्वर्तते।**

## हिन्दी

अत्यन्त गौरव का विषय है कि इस वर्ष 2017 में साहित्यक्षेत्र में दिये जाने वाले राष्ट्र के सर्वोच्चपुरस्कार 'ज्ञानपीठ' के लिए प्रगतिशील चिन्तन की प्रेरिका संघर्षशीला, हिन्दीभाषा की उत्कृष्टलेखिका कृष्णासोबती का नाम निर्णायक मण्डल के द्वारा सर्वसम्मति से समर्थित किया गया। हिन्दी साहित्य की विविध-विधाओं में सशक्त, सरस एवं सार्थक लेखन करने वाली 'कृष्णासोबती' इस समय राष्ट्र की सबसे बुजुर्ग लेखिका है। कृष्णा सोबती का जन्म 18 फरवरी 1925 में इस समय पाकिस्तान में स्थित गुजरात प्रान्त में हुआ था। कश्मीर प्रदेश की पहाड़ियों के निकट स्थित इस रमणीय प्रदेश में निवास करने वाली कृष्णा सोबती बाल्यावस्था से ही प्रकृति की आराधिका हैं। नतोन्नत पर्वतीय प्रदेश में अश्वारोहण करना कृष्णा सोबती के लिए स्वाभाविक कर्म था। यही कारण है कि विदुषी कृष्णासोबती की रचनाओं में यत्र तत्र सर्वत्र प्रकृति की छटा प्रतिबिम्बित है। चिनार प्रान्त के निकट बड़ी होने वाली कृष्णा सोबती के पिता सिविल सेवा में उच्चाधिकारी के पद पर कार्यरत थे। पुत्री के लिये उत्तम शिक्षा की व्यवस्था के लिए उन्होंने अपने पुत्री का प्रवेश शिमलानगर में स्थित छात्रोत्कर्ष के लिए प्रसिद्ध ''लेडी इरविन'' नामक विद्यालय में व्यवस्थित किया। सम्पूर्ण सुविधाओं से सम्पन्न इस विद्यालय में अभिजात कुलों के विभिन्न रुचि सम्पन्न बालकों के साथ पढ़ते हुए 'कृष्णासोबती' की बहुमुखी प्रतिभा सहज ही प्रस्फुटित हुई। हिन्दीभाषा के प्रसिद्ध लेखक निर्मल वर्मा इसी विद्यालय में कृष्णा सोबती के सहपाठी थे। मैं सबसे विशिष्ट हूँ कृष्णा सोबती का यह चिन्तन इनकी वेशभूषा, व्यवहार यहाँ तक कि इनकी रचनाओं में भी दिखाई देता है। देश के विभाजन के पश्चात् 'कृष्णा सोबती' दिल्ली आ गई और तबसे यहीं रहकर साहित्य सेवा में संलग्न हो गई। 1950 में विदुषी कृष्णाजी के द्वारा विरचित कथा 'लामा' सबसे पहले प्रकाशित हुई। उसके पश्चात् प्रकाशित होने वाली मित्रो मरजानी, दिलोदानिश, हमहशमत, यारों के यार, सूरजमुखी, जिन्दगीनामा आदि रचनाएँ हिन्दी साहित्य जगत में समसामयिक तथ्यों एवं नारी की सामाजिक दशा की दर्शिका है। मेधाविनी कृष्णा सोबती की प्रारम्भिक कृतियों में पंजाबी भाषा का बाहुल्य दिखाई देता है किन्तु हिन्दी भाषा के प्रख्यात लेखक श्री अमृतलाल नागर के परामर्श से एवं सतत् अभ्यास एवं श्रम से कृष्णा सोबती ने दस वर्षो में हिन्दी भाषा में कुशलता प्राप्त कर अनेक समसामयिक तथ्यों को प्रकाशित करने वाली सशक्त रचनाओं से लोक सम्मान प्राप्त किया है। परम्परा एवं लीक से हटकर चलना कृष्णासोबती का सहज चिन्तन है। 70 वर्ष की आयु में डोगरी भाषा के लेखक 'शिवनाथ' के साथ विवाह बन्धन स्वीकार करना इसका स्पष्ट प्रमाण है। अपने उत्कृष्ट एवं विशिष्ट लेखन के लिए कृष्णा सोबती अनेक दुर्लभ पुरस्कार एवं सम्मान से अलंकृत हुई है। 1980 ई में कृष्णा सोबती द्वारा रचित 'जिन्दगीनामा' नामक रचना के लिए इन्हें 'अकादमी' द्वारा सम्मानित किया गया। वर्ष 1996 में 'साहित्य अकादमी' ने कृष्णासोबती को 'फेलोशिप' प्रदान की। वर्ष 2001 में 'हिन्दी अकादमी' दिल्ली द्वारा कृष्णा जी को 'शलाका सम्मान' से सम्मानित किया गया। 2010 ई. में 'पद्मभूषण' जैसे महनीय अलंकरण को कृष्णा सोबती अस्वीकार कर दिया। अब 2017 में राष्ट्र में साहित्य क्षेत्र में ने सर्वोच्च पुरस्कार प्राप्त करने वाली कृष्णासोबती नारियों की प्रोरणा स्रोत एवं विशिष्ट विभूति है।

**-सी-276, भाभामार्ग, तिलकनगर, जयपुर**

आयुर्वेद-स्तम्भः

# परं वृष्यं रसायनमामलकम्

❑ प्रो. बनवारीलालगौडः
पूर्व-कुलपतिः

**कार्तिकमासस्य शुक्लपक्षे यदा नवमी तिथिरायाति, तदोत्तरे भारते सोत्साहाः स्त्रियः आमलकीवृक्षस्य पूजनं विधिविधानपूर्वकं कुर्वन्ति। यतो ह्येषाऽऽमलकी नाम्ना प्रसिद्धा पर्वात्मिका तिथिरापतति। अग्रिमें हि दिवसे सर्वाः स्त्रियः विस्मरन्ति तमामलकीवृक्षम्। नैतदुचितम्, अस्माकमायुर्वेदज्ञाः महर्षयः स्वास्थ्यमभिलक्ष्यानेकविधानां पर्वणां संस्थापनं विशिष्टे काले कृतवन्तः। विशिष्टेष्वेतादृग्विधेषु पर्वस्वामलकी नवम्यतीव महत्त्वपूर्णा वर्तते। यतो ह्येषः कालः शरदोऽन्तिमः कालो वर्तते, पश्चाच्च हेमन्तस्यागमनं शीघ्रमेव भविष्यतीति संकेतमपि ददाति एषः मासः। सामान्यतया मार्गशीर्षमासतः हेमन्तस्य प्रारम्भो भवत्युत्तरे भारते।**

कार्तिक माह के शुक्ल पक्ष में जब नवमी तिथि आती है, तब उत्तर भारत में उत्साहपूर्वक स्त्रियाँ आँवले के वृक्ष का पूजन विधिविधान पूर्व करती हैं। क्योंकि यह आमलकी नवमी नाम से प्रसिद्ध त्यौहार स्वरूप की तिथि आती है। अगले ही दिन सभी स्त्रियाँ उस आँवले के वृक्ष को भूल जाती हैं। यह उचित नहीं है, आयुर्वेद को जानने वाले हमारे महर्षियों ने स्वास्थ्य को ध्यान में रखकर अनेक प्रकार के त्यौहारों की स्थापना विशिष्ट काल में की। इस प्रकार के विशिष्ट त्योंहारों में आँवला नवमी अत्यन्त महत्त्वपूर्ण है। क्योंकि यह काल शरद् ऋतु का अन्तिम काल है, और इसके बाद हेमन्त ऋतु का आगमन शीघ्र ही होगा, ऐसा संकेत भी यह महीना देता है। सामान्यतया मार्गशीर्ष मास से उत्तर भारत में हेमन्त ऋतु का प्रारम्भ होता है।

**हेमन्ते तु ऋतौ विशेषेण कालस्य स्वभावे शीतताऽऽपतति। शीते च काले शीतानिलस्पर्शसंरुद्धः पक्ता बली भवति, अन्तरग्नौ व्यस्थितः जाठराग्निस्वरूपः स पक्ता विशेषेण बली भवत्यतः सः मात्रा द्रव्य गुरुक्षमः गृहीतं गुरुमप्याहारं शीघ्रं पचति। अस्मादेव हि कारणाज्जनाः हेमन्ते शिशिरे च मोदकापूपलप्सिकादीनां गुरूणामाहार-जातानामानन्दमनुभवन्ति। आयुर्वेदीयाश्चिकित्सका अपि विभिन्नानां बलप्रदानां बृंहणकारकाणां च विशिष्टानां द्रव्याणां प्रयोगमवलेहपाकादिषु कुर्वन्ति। विभिन्नानां रसायनात्मकानां कल्पानां प्रयोगस्य प्रचलनं वर्ततेऽस्मिन् काले। च्यवनप्राशब्राह्मरसायन-द्राक्षावलेह-मूसलीपाक-बादामपाक-कपिकच्छुपाकाश्वगन्धापाकेत्यादीनां प्रसिद्धानां बृंहयाणानां रसायनानां वाजीकरणानां च सेवनं कारयन्त्यायुर्वेदीयाश्चिकित्सकाः। रसभस्मादीनां प्रयोगमपि निश्चिन्ततापूर्वकं कुर्वन्त्येते।**

हेमन्त ऋतु में तो विशेषरूप से काल के स्वभाव में शीतता आ जाती है। और शीतकाल में शीतवायु के (शरीर से) संस्पर्श के कारण संकद्ध जाठराग्नि बलवान् हो जाती है, अन्तरग्नि में व्यवस्थित जाठराग्निस्वरूप वाली वह पाचकाग्नि विशेष रूप से बलवान् हो जाती है अतः वह मात्रा में अधिक को तथा गुरु द्रव्य को पचाने में समर्थ वह गृहीत गुरु आहार को शीघ्र पचा देती है। इसी कारण से लोग हेमन्त और शिशिर में लड्डू, पूए, हलुआ इत्यादि गुरु आहार-द्रव्यों का आनन्द लेते हैं। आयुर्वेद-चिकित्सक भी विभिन्न बलप्रद और बृंहण करने वाले द्रव्यों का प्रयोग अवलेह और पाकादि के रूप में करते है। विभिन्न रसायनप्रद कल्पों के प्रयोग का प्रचलन इस काल में है। च्यवनप्राश, ब्राह्मरसायन, द्राक्षावलेह, मूसलीपाक, बादामपाक, कौंचपाक, अश्वगन्धापाक इत्यादि प्रसिद्ध बृंहण करने वाले, रसायन और वाजीकरण योगों को सेवन आयुर्वेद-चिकित्सक करवाते हैं। रस-भस्मादि का प्रयोग भी ये निश्चिन्ततापूर्वक करते हैं।

**प्रकृतिरपि पर्यावरणानुकूलानि सेवनीयांनि सुखकारकाणि शुभफलप्रदानि द्रव्याणि ददाति जनेभ्यः। कालेऽस्मिन् रसायनगुणात्मकं सर्वोत्कृष्टमामलकी फलमप्युत्पन्नं भवति। आमलकी नवमी तु संसूचयत्यस्मान् यदामलकी वृक्षं प्रति विशेषेण दत्तावधानाः भवेयुः**

**भवन्तः सर्वे। अस्य वृक्षस्य कालेऽस्मिन् विशेषेण संरक्षणं परिपालनं परिवर्धनं परिपूर्णं कर्म च कुर्युः। आमलकी-नवम्यनन्तरं कालप्रभावाद् यदा शीघ्रं हि हेमन्तस्यागमनं भविष्यति तदाऽऽपूर्णरसवीर्यात्मका-नामामलकी-फलानामुपयोगं रसायनात्मकं भविष्यतीति संकेतं ददात्येषा विशिष्टा नवमी। आमलकीफलानां गुणान् विशेषेण निर्दिशत्याचार्यः सुश्रुतः-**

**अम्लं समधुरं तिक्तं कषायं कटुकं सदम्।**
**चक्षुष्यं सर्वदोषघ्नं वृष्यमामलकीफलम्।।**

**( सु. सू. 46/143 )**

प्रकृति भी पर्यावरण के अनुकूल सेवन करने योग्य सुखकारक, शुभफलप्रद द्रव्य लोगों को देती है। इस काल में रसायन गुणवाला सर्वोत्कृष्ट आमलकीफल (आँवला) भी उत्पन्न होता है। आँवला नवमी तो हम को सूचना देती है कि आँवले के वृक्ष के प्रति विशेष रूप से आप लोगों को ध्यान देने वाला होना चाहिए। इस वृक्ष का इस काल में विशेषरूप से संरक्षण और परिपालन औरपरिवर्धन करने वाला का आप लोग करें। आँवला नवमी के बाद काल के प्रभाव से जब शीघ्र ही हेमन्त का आगमन होगा तब परिपूर्ण रस और वीर्य वाले आँवलों का उपयोग रसायन रूप मे होगा ऐसा संकेत यह विशिष्ट नवमी देती है। आमलकी-फलों के गुणों को आचार्य विशेष रूप से बताते हैं-

आमलकी-फल कुछ मधुर, खट्टा, कडुआ, कसैला और कटु (चरपरा) होता है तथा दस्तावर, आँखों के लिए हितकर होता है एवं सब दोषों को दूर करने वाला तथा वृष्य होता है।

**यद्यपि सम्पूर्णे हि वर्षे फलप्रदानामेषामामलकी-फलानां प्रयोगः श्रेष्ठो भवति, पुनरपि वृक्षात् सद्यः प्राप्तानां फलानामुपयोगोऽधिकः श्रेयस्करो भवति। अतः हेमन्ते तथा शिशिरे येन केन प्रकारेणापि सद्यः प्राप्तानां हरितानामामलकीफलानां प्रयोगः करणीयः। सम्पूर्णे वर्षे प्रयोज्यमेतदामलकीफलमत एव भैषज्यकल्पना-विद्भी रसाचार्यैरनेन विविधानां कल्पनानां निर्माणं विहितम्। तासु कासाञ्चित् कल्पनानां निर्माणविधि-सहितमुल्लेखमग्रिमें लेखे करिष्यामि। अत्र तु सद्यः प्राप्तानामामलकीफलानां प्रयोगं वच्मि-**

**1. केवलमेकं सद्यः सम्प्राप्तमामलकीफलं गृहीत्वा सम्यक् प्रक्षाल्य मुखे धारयित्वा शनैः शनैः चर्वणं कर्तव्यम्। अनेन मुखवैशद्यं जाठराग्नेरभिवर्धनं रोग-प्रतिरोधक्षमतायाश्चाभिवर्धनं भवति। येषामनूर्जताजन्यः प्रतिश्यायः वारं वारं समुत्पद्यते तेषु तस्य निवृत्तिर्भवति।**

**2. निरस्थिस्वरूपस्य पिण्डखर्जूरस्य ग्रहणं कृत्वा तस्मिन् निरस्थिस्वरूपं क्षोदितमामलकीफलं पूरयित्वा मुखे सन्धार्य शनैः शनैः चर्वणं कर्तव्यम् श्वासकास निबर्हणं ह्येतत् प्रतिश्यायहरमपि वर्तते।**

**3. हरितां हरिद्रां संक्षोद्य तस्यां मोदितमामलकीफलं सम्मिश्र्य यथारुचि सलवणं मरिचचूर्णं प्रक्षिप्य भोजनेन सह भक्षणं कर्तव्यम्। अथवाऽग्नौ विधिवत् परिपक्वस्य शाकवन्निर्मितस्य व्यञ्जनस्य प्रयोगोऽपि रुचिकरो वर्तते। श्वासकासप्रतिश्यायैः परिपीडितः यद्यस्य प्रयोगं करोति तदा तस्य कफस्य ह्रासो भवति रोगाश्चैते विनष्टाः भवन्ति। रक्तवृद्धिकरमेतद्व्यञ्जनं जाठराग्नेश्चाप्यभिवर्द्धकं वर्तते।**

**4. 30 मि. लि. परिमाणस्यामलकीस्वरसस्य पानं प्रतिदिनं करणेन शरीरक्लेदस्य ह्रासो भवति शरीरे। गर्जरस्वरसेन सह प्रयुक्त आमलकीस्वरसः सद्यः सन्तर्पकः रक्ताभि-वर्धकश्च भवति।**

**5. सुनिर्मितायां क्वथितायां 'कढी' इत्याख्यायां व्यञ्जन-स्वरूपिण्यां पेयायामप्यामलकीस्वरसस्य किञ्चिन्मात्र-स्य सम्मिश्रणं कृत्वा पानेन प्रतिश्याये लाभो भवति। अस्यास्तु पानमुष्णस्वरूप एव कर्तव्यम्।**

**6. येन केनाप्यन्येन विधिना हरितानां सद्यः सम्प्राप्तानाम् आमलकीफलानां प्रयोगः करणीयः।**

**7. आलुकैः सह स्विन्नीभूतैरामलकैः शाकात्मकं व्यञ्जनं विधेयम्। अस्य प्रयोगः रुचिकरो वर्तते।**

**8. मेथिकाबीजैः सह स्विन्नीकृतैरामलकैः शाकात्मकं व्यञ्जनं विधेयम्। अत्रैव च छुहारानामधेयस्य शुष्कस्य**

**पिण्डखर्जूरस्य खण्डानि संयोजयेत्, लघु-द्राक्षाफलानां (किशमिशनामधेयानां) प्रक्षेपोऽपि समुचितः। लक्षणार्द्रकमरिचधान्यकजीरकहरिद्रादीनामपि यथोचितम् प्रक्षेपणं कर्तव्यम्। स्वल्पा शर्करापि प्रक्षेप्या। अतीव रुचिकरं ह्येतद् व्यञ्जनम् उत्कृष्टं फलप्रदञ्चापि।**

**9. स्विन्नीकृतैः केवलामलकैः शाकात्मकं रागात्मकं वा व्यञ्जनं विधेयम्। सशर्करमशर्करं वैतद्व्यञ्जनमति-रुचिकरं भवति।**

यद्यपि सम्पूर्ण वर्ष में फलदायी (लाभकारी) इन आमलकी-फलों का प्रयोग श्रेष्ठ होता है, फिर भी वृक्ष से तत्काल प्राप्त किए गए (ताजा) फलों का उपयोग अधिक श्रेष्ठ होता है। इसलिए हेमन्त तथा शिशिर में जिस किसी भीतरी के से तत्काल प्राप्त किए गए (तोड़े गए) ताजा आर्द्र आँवलों का प्रयोग करना चाहिए। सम्पूर्ण वर्ष में यह आमलकी फल प्रयोग करने के लिए उपयुक्त है इसलिए भैषज्य कल्पना जानने वाले रसाचार्यो के द्वारा इस से अनेक कल्पनाओं का निर्माण किया गया है। (बताया गया है)। उनमें से कुछ कल्पनाओं का निर्माण-विधि सहित उल्लेख अग्रिम लेख में करूँगा। यहाँ तो तत्काल प्राप्त आँवलों का प्रयोग करता हूँ-

1. केवल एक ताजा आँवला ले कर अच्छी तरह धोकर मुख में धारण कर धीरे-धीरे चबाना चाहिए। इससे मुख में विशदता (स्वच्छता), जाठराग्नि की वृद्धि और रोग प्रतिरोध क्षमता की अभिवृद्धि होती है।

2. गुठली निकाले हुए पिण्ड खजूर को लेकर उसमें गुठली निकले हुए कूटे हुए आँवले को भरकर मुख में रखकर धीरे-धीरे चबाना चाहिए। यह श्वास-कास को दूर करने वाला है और प्रतिश्याय (जुकाम) को भी दूर करता है।

3. ताजा हल्दी (गीली हल्दी) कूट कर उसमें कूटे हुए (बिना गुठली के) आँवले को मिलाकर रुचि के अनुसार नमक-मरिच डालकर भोजन के साथ खाना चाहिए। अथवा अग्नि पर विधिवत् पकाए हुए शाक की तरह बनाए गए व्यञ्जन का प्रयोग भी रुचिकर होता है। श्वास-कास और प्रतिश्याय से पीडित व्यक्ति यदि इसका प्रयोग करता है तो उसके कफ में कमी आती है और ये रोग विनष्ट होते हैं। यह व्यञ्जन रक्त को बढाने वाला है तथा जाठराग्नि को भी बढाने वाला है।

4. 30 मि.लि. परिमाण के आँवले के रसको प्रतिदिन पीने से शरीर के अन्दर स्थित क्लेद (चिपचिपाहट, अनावश्यक गीलापन) का ह्रास होता है। 'कोलेस्टरोल' नाम के बढे हुए स्नेह की भी शरीर में कमी होती है। गाजर के स्वरस के साथ प्रयुक्त किया गया आँवले का रस तत्काल सन्तर्पण करने वाला और रक्त को बढाने वाला होता है।

5. अच्छी प्रकार से उबाली गई कढी नाम की व्यञ्जन स्वरूपिणी पेया (पीने योग्य पतली कढी) में थोड़ा आँवले का रस मिलाकर पीने से प्रतिश्याय में लाभ होता है। इसको गर्म-गर्म ही पीना चाहिए।

6. जिस किसी भी अन्य विधि से ताजा (तत्काल तोडे गए) आँवले का प्रयोग करना चाहिए।

7. आलू के साथ उबाले गए आँवलों में शाकस्वरूपक व्यञ्जन बनाना चाहिए। इसका प्रयोग रूचिकर है।

8. दानामेथी के साथ उबाले गए आँवलों से शाकरूपी व्यञ्जन बनाना चाहिए। इसमे छुहारानामक सूखे पिण्डखजूर के टुकड़ों को मिलाना चाहिए। छोटे द्राक्षाफलों (किशमिश) को इसमें डालना भी उपयुकत है। लवण, अदरक, मिर्च, धनिया, जीरा और हल्दी इत्यादि को भी यथोचित रूप से डालना चाहिए। इसमें थोडी चीनी (या मिश्री) भी डालनी चाहिए। यह व्यञ्जन अत्यन्त ही रूचिकर होता है तथा उत्तम फलदायी भी होता है।

9. उबाले गए केवल आँवलों से भी शाक या चटनी के रूप में व्यञ्जन बनाना चाहिए। शक्कर मिलाया हुआ या बिना शक्कर के यह व्यञ्जन अत्यन्त रूचिकर होता है।

**80, सेनापति हाउस के पीछे**
**प्रेमनगरम्, झोटवाड़ा, जयपुरम्**

प्रेषण–प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८–५७

डाक पंजीयन
Jaipur City/429/2015-17

हार्दिक शुभकामनाओं सहित :-

# ए इन्फ्रास्ट्रक्चर लिमिटेड

निर्माता

## ए.सी. प्रेशर पाइप्स

तकनीकी रूप से सर्वोत्तम, पेयजल, कृषि, सीवरेज एवम् सेनिटेशन में उपयोगी
तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ
फाइबर सीमेंट की नालीदार चादरें

## छत एक, लाभ अनेक

हमीरगढ़ भीलवाड़ा - 311025 (राजस्थान) दूरभाष: 01482-286106/07
दिल्ली कार्यालय: ए-9, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाष:- 011-26850488
जयपुर पाइप कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड़, एम.आई.रोड़, जयपुर
फोन: 0141-2369691, 2370566, फैक्स : 0141-4019691
जयपुर चादरें कार्यालय: शोरूम नं. 2, फर्स्ट फ्लोर, नियर रिद्धी-सिद्धी स्वीट्स, लिंक रोड़, गोपालपुरा, जयपुर
फोन : 0141-3206915, फैक्स:- 0141-2763656

## राष्ट्रीय विचारों के लिए पढ़े

(हिन्दी) साप्ताहिक
**पाञ्चजन्य**
बात भारत की

हमारी विशेषताएं

(English) Weekly
**Organiser**



- राष्ट्रीय दृष्टिकोण
- 6 दशकों से लगातार प्रकाशित
- संसद तथा विधान सभाओं को गुंजायमान करने वाला पत्र
- विश्वसनीय प्रतिष्ठित दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में पहुंच
- ई–पेपर की सुविधा



You can subscribe Panchjanya/Organiser Weeklies online through our Websites: www.panchjanya.com, www.organiser.org

वार्षिक ग्राहक शुल्क
भारत में ₹ 700/- (साधारण डाक द्वारा) • ₹ 820/- (स्थानीय वितरक द्वारा)
विदेशों में $ 70 (हवाई डाक द्वारा)

REACH MILLIONS OF CONSUMERS THROUGH OUR WEEKLIES

प्रसार विभाग
## भारत प्रकाशन (दिल्ली) लिमिटेड
2322, संस्कृति भवन, लक्ष्मी नारायण गली, पहाड़गंज, नई दिल्ली-11005
फोन : 011-47642000, 01, 02 E-mail: circ@pbdl.in

स्वत्वाधिकारी–भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् दूरभाषः २३७९०१४ प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाषः २३६५७२१ पत्रसंकेतः– भारतीभवनम्, बी–१५ न्यू कॉलोनी, जयपुरम्–३०२ ००१ भारतीयसंस्कृतप्रचार संस्थानस्य अध्यक्षः शंकर प्रसाद शुक्लः

प्रतिष्ठायाम्,